न शायये योयमुनातटं तत्र शब्दानुसारेण यावन्स्वैरं स गच्छति तावच्चराणानि खादन्तं तं वृषभं तं ददर्श सः उपेत्य चांति
कं तस्य तत्त्वातेन च संस्तवं गत्वा तस्मै स सिंहाय यथावस्तु शशंस स महोक्षस्त्वया दृष्टः संस्तवश्च तेन तोयदि त
द्दिहानय तं युक्त्या यावत्पश्यामि कादृशं इत्युक्त्वा स प्रहृष्टस्तं सिंहं पिंगलिकस्तता वृषस्य प्राहिणोत्तस्य पार्श्वं
दमनकं पुनः एह्याह्वयति त्वां ष्टस्त्वां मीमृगाधिपः इति गत्वा दमनकेनोक्तः स वृषभो भयात् यदा न प्रतिपेदे
तत्र हा गत्वा वत्तं पुनः तं निजस्वामिनं सिंहं तस्याभयमदापयत् एत्या त्रयेन चाश्वास्य ततः संजीवकं सतं वृष
भूतं दमनको नैषीत्केसरिणोंतिकं स चागतं तं प्रणतं दृष्ट्वा सिंहः सादरः उवाचैवेह तिष्ठ त्वं मत्पार्श्वो निर्भयो
धुना तथेति ते तत्र स्थेनाहृतः स तथाक्रमात् उक्ष्णाय यथान्यविमुखस्तद्वशोभूत्स केसरी ततो दमनको- राम

वादीत्खिन्नः करटकोऽह : पश्य संजीवकहृतः स्वामीनावामवेक्ष्यते एक एवामिषं भुंक्ते न भागं नो प्रयच्छति मू
ढबुद्धिः प्रभुश्चायमूक्ष्णानेनाघशिक्ष्यते ततो मयैव दोषोयं यदेतं वृषमानयं तत्तथाहं करिष्यामि यथो
क्षायं विनंक्ष्यति अस्थानव्यसनाश्चैष निर्वर्त्स्यति प्रियथा प्रभुः एतद्दमनकाच्छ्रुत्वा वोचत्करटकोपि सः सत्वंन
कर्तुमधुना शक्ष्यत्येतद्भवानपि ततो दमनको वादीशक्ष्यामि प्रज्ञया ध्रुवं स न शक्नोति किं यस्य प्रज्ञा नाय
दिहीयते तथा च मकारस्येतां बकहंतुः कथां शृणु आसीत्कोपि बकः स वृद्धमत्स्याढ्ये सरसि क्वचित् मत्स्या
स्तत्र पलायंते तस्य दृष्टिपथाद्भयात् अप्राप्नुवंश्च निर्यातान्स मत्स्यानब्रवीत्पुनः इहागतो मत्स्यघाती पु
रुषः कोपि जालवान् स जालेनाचिराद्युष्मान्गृहीत्वा निहनिष्यति तत्कुरुध्वं मम वचो विश्वासो वोस्ति चेन्मयि।
अस्त्येकांते सरस्त्वच्छं मज्ञातमिह धीवरैः एतत्तत्र निवासार्थं नीत्वैकैकं क्षिपामि वः तच्छ्रुत्वा सभये रूचे मत्स्यैस्ते
जडबुद्धिभिः एवं कुरुध्वं विश्वस्ता वयं त्वय्यखिला इति ततो बकस्तानेकैकं मत्स्यान्नीत्वा शिलातले विन्य
स्य भक्षयामास स बकः कृन्विप्रलंभकः दृष्ट्वा मीनान्नयंतं तं मकरास्तत्सरोगतः एको बकं तं पप्रच्छ नयसि क्व
सी तिमींस्ति ततस्तं सतदेवाह बको मत्स्याननुवाचयत् तेन पीतोरुबोपादान् समामपि नयेति तं सोपि तन्मांसगर्वा
धबुद्धिरादायतं बकः उत्पत्य प्रापयत्ति तद्यावद्वध्यशिलातलं तावत्तं जग्ध मीनास्थिशकलान्यत्र वीक्ष्य सः।

तंबुध्वातेस्ममकरोबकंविश्वास्यभक्षकं ततःशिलातलन्यस्तमात्रस्तस्यवतत्क्षणं बकस्यमकरोधीमांश्चकर्त्त
विक्लवःशिरः गत्वावशेषमत्स्यानांयथावृत्तंशशंसतत् तेवाथभिनन्दुस्तंतुष्टाःप्राणप्रदायिनं प्रज्ञानामबलं
तस्मान्निष्प्रज्ञस्यबलेनकिं एतांचसिंहशशयोःकथामत्रापरांशृणु अभत्कोपिवनेसिंहएकवीरोपराजितः सच
यंयंददर्शात्रसत्त्वंतंतंन्यपातयत् ततःसोत्यार्थितःसर्वैःसंभूयात्रमृगादिभिः आहारायतवैकैकंप्रेषयामोदिने
दिने तत्सर्वान्युगपद्धत्वास्वार्थहानिंकरोषिकिं इतितद्वचनंसिंहःसतथेत्यन्वमन्यत ततःप्राणिनमेकैकंतस्मै
प्रत्यहमश्नते एकदाशशकस्यागाद्वारएकस्यतत्रते ससर्वैःप्रेषितोगच्छन्शशोधीमानचिंतयत् सधीरोयोन
संमोहमापकालेपिगच्छति उपस्थितेपिमृत्यौतद्युक्तिंयावकरोम्यहं इत्यालोच्यसतंसिंहंविलंब्यशशको
भ्यगात् उपागतंविलंबेनकेसरीनिजगादसः अरेवेलाव्यतिक्रांताममाहारकथंत्वया वधादभ्यधिकंकिं
वाकर्त्तव्यंतेमयाशठ इत्युक्तवंतंतंसिंहंप्रह्वःसशशकोब्रवीत् नमेदेवापराधोयंस्ववशोनाहमद्ययत् मा
र्गेबाधयत्सिंहेनद्वितीयेनाकृतश्चिरात् तच्छ्रुत्वास्फाल्यलांगूलंसिंहःक्रोधारुणेक्षणः सोब्रवीत्कोद्वितीयो
सोसिंहोमेदर्श्यतांत्वया आगत्यदृश्यतांदेवेत्युक्त्वासोपिनिनायतं तथेत्यन्वागतंसिंहंदूरंकूपांतरंशशः
इहांतस्तंस्थितंपश्येत्युक्तस्तत्रचतेनसः शशकेनक्रुधागर्जन्सिंहोंतःकूपमैक्षत दृष्ट्वास्वच्छेचतोयेस्वंप्रतिबिं

ध्वनिशम्य च स्वगर्जितप्रतिरवंम वा तत्रातिगर्जितं प्रतिसिंहंसकोपेनतद्वधायमृगाधिपः आत्मानमक्षिपत्कूपेमू
ढोत्रैवव्यपादिच शशःस्वप्रज्ञयोत्तीर्ण्णस्तोरुवार्यचाखिलान् मृगानाव्रातदाख्यायस्ववृत्तंतानानंदयत् एवंप्रज्ञै
वपरमंबलंननुपराक्रमः यत्प्रभावेननिहितःशशकेनापिकेसरी तदहंसाधयाम्येवप्रज्ञयास्वमभीप्सितं एवंद
मनकेनोक्तेतूष्णिंकरटकोभवत् ततोदमनकोगत्वातस्यपिंगलकस्यसः सिंहस्यस्वप्रभोरासीदंतिकेदुर्मनाइवः॥
पृष्टश्चकारणंतेनतमुवाचजनांतिकं बुधानयुज्यतेतूष्णींस्थातुंदेववदाम्यतः अनियुक्तोपिच ब्रूयाद्यदिष्टे-
स्वामिनोहितं तद्विवाहायान्यथाबुद्धिमद्विज्ञप्तिमिमांमांशृणु वृषःसंजीविकोयंत्वांहत्वाराज्यंविकांक्षति मंत्रि
णाहिसतातेनत्वंभाष्करितिनिश्चितः त्वज्जिघांसुर्धुनोतिस्मशृंगयुग्मंनिजायुधं निर्भयाजीवथस्तुत्वंमयिरात्रि-
चरणाशने तदेतहन्मोयुक्त्यामुंमृगेंद्रसांसभोजनं आश्वास्योपजपत्येवंप्राणिनश्चवनेवने तदेतंश्चिंतयरक्षंना
त्यस्मिंसतिशर्मते एवंदमनकेनोक्तःसतंपिंगलकोभ्यधात् बलीवर्दोवराकोयंकिंकुर्याच्चरणाभुग्मम दत्वाभ
यंकथंहन्यामेतंचशरणागतं एतच्छ्रुत्वादमनकःप्राहमास्मैवमादिश यस्तुल्यःक्रियतेराज्ञातेनतच्छ्रीःप्रसर्प्य-
ति द्वयोर्द्दत्तपदासाचतयोरुच्छ्रितयोश्चला नशक्नोतिचिरंस्थातुंध्रुवमेकंविमुंचति प्रभुश्चयोहितंद्वेष्टिसेवते-
वाहितंसदा सवर्ज्जनीयोविद्वद्भिर्वैद्यैर्दुष्टातुरोयथा अप्रियस्यप्रथमतःपरिणामेहितस्यच वक्ताश्रोताचयत्र

पं०क०१०
२०
20

स्यात्तत्रश्रीःकृतस्येपदं नशृणोतिसतांमंत्रमसतांचशृणोतियः अचिरेणाससंप्राप्यविपदंपरितप्यते त
दस्मिन्नुक्षिके कःस्नेहस्तवदेवकिलमस्यवा दुष्यतोभयदानंतवशरणागततावका किंचैतस्यभवत्यार्श्वेनित्यं
संनिहितस्यगोः देवकीटाप्रजायंतेतकात्रपुरीषयोः तेचेक्षिशंतमंत्तेत्तदंताघातव्रणाव्दते शरीरेतवतक्किंनहे
त्रःस्याद्युक्तितोवधः दुर्जनश्चेस्वयंदोषंवियभिन्नकरोतितत् उत्पद्यतेसतत्संगादत्रैवश्रूयताकथा राज्ञःकस्या
पिशयनेविरमासीदलक्षिता यूकाकुतश्चिदागत्यनाम्नामंदविसर्प्पिणी अकस्मात्तत्रचोपेत्यकुतोपिपवने-
रितः विवेशशयनीयंतंटिंटिकोनाममकुणः मन्निवासमिमंकस्मादागतस्त्वंव्रजान्यतः इतिमंदविसर्प्पिण्या
सदृष्टाजगदेतया अपीतपूर्वंपास्यामिराजास्रक्तत्प्रसादमे देहीहवस्तुमितितामवादीसोपिटिंटिभः ततो
नुरोधाद्दाहस्मसातंयद्येवमास्वतत् किंत्वस्याराज्ञोनाकालेदंशोदेयस्त्वयासखे देयोस्यदंशःसुप्तस्यार्तिसक्तस्य
वालघु तच्छ्रुत्वाटिंटिभःसोत्रतथेत्युक्त्वाव्यतिष्ठत नक्तंशय्यास्थितंतं न्टपमाशुददंशसः उत्तस्थौचततोरा
जाहादष्टोस्मीतिचब्रुवन् ततःपलायितेतस्मिंस्त्वरितंमकणेशठे विचित्यराजभृत्यैःसालब्धायूकान्यपात्यत
एवंटिंटिभसंपर्कान्नष्टामंदविसर्प्पिणी तत्संजीवकसंगस्तेनशिवायभविष्यति नमेप्रत्येषिचेत्तत्त्वंस्वयंद्रक्ष्य
स्युपागतं शिरोधुनानंदर्प्पेणश्टंगयोःशूलशातयोः इत्युक्त्वाविरतातितेननीतोदमनकेनसः सिंहःपिंगलक राम
२०

गय

श्वकेवधंसंजीवकंहृदि लब्ध्वातस्याशयंसिंहंक्षणाद्दमनकस्ततः तस्यसंजीवकस्यागात्सविषण्णइवांतिकं किंमाद
गसिकिंमित्रशरीरेकुशलंतव इतिपृष्टश्चतेनात्रदृष्ट्वेणास्मजगादतं किंगोवकस्यकुशलंकश्चराज्ञांसदाप्रि-
यः कोर्थीनलाघवंयातःककालस्यनगोचरः इत्युक्तेवंतंपप्रच्छतंससंजीवकःपुनः किंमुद्विग्नइवाद्यत्वंवय
स्यात्रोच्यतामिति ततोदमनकोवादीच्छृणुश्रीत्यावदामिते मृगराजोविरुद्धोसौजातःपिंगलकोद्यते निरपे
क्षोस्थिरस्नेहोहत्वात्वांभोक्तुमिच्छति हिंस्रंपरिच्छदंचास्ययश्यामिप्रेरकंतथा वचोदमनकस्यैतत्सशर्वंप्रत्यया
द्दजुः सत्यंविचिंत्यवृषभोविमनाततिजगादतं धिक्सेवाप्रतिपन्नोपिक्षुद्रःक्षुद्रपरिग्रहः प्रभुर्वैरित्वमेवेतितथा
चेमांकथांशृणु आसीन्मदोत्कटोनामसिंहःकापिवनांतरे त्रयस्तस्यानुगास्त्वासन्द्वीपिवायसजंबुकाः ससिं
होत्रवनेद्राक्षीददृष्टचरमेकदा करभंसार्थविभ्रष्टंप्रविष्टंहासनात्मतिं कोयंप्राणीतिसाश्चर्येवदत्यस्मिन्मृ
गाधिपे उष्ट्रोयमितिवक्तिस्मदेशदृश्वात्रवायसः ततोदत्ताभयस्तेनसिंहेनानीयकौतुकात् उष्ट्रःसोनुचरी
त्वस्यातिकेस्थापिवोभवत् एकदाव्रणितास्वस्थःससिंहोगजयुद्धतः उपवासान्बहूंश्चक्रेस्वस्थैस्तैःसहितो
नुगैः ततःक्लांतःसभक्ष्यार्थंभ्रमन्सिंहोनवाप्ततत् किंकार्य्यमित्यपृच्छत्तानुष्ट्रमुक्त्वानुगान्रहः तेत्तमूचुःप्र
भोवाच्यमस्माभिर्युक्तमापदि उष्ट्रेणसाकंकिंसख्यंकिंनासावेवक्ष्यते तृणाशीचायमस्माकंभक्ष्यएवामिषा

व०त्क०१०
२१
81

शिनां वहूनामात्मनश्चार्थे किंचैकोभज्यतेन किं दत्त्वाभयं कथंहन्मात्युच्यते प्रभुणा यदिः दापयामःस्ववा
वातयुक्त्यातनुममुंवयं इत्युक्तेतैरनुज्ञातेतेन सिंहेन वायसः विधायसंविदंगत्वाकरभंतमभाषत एषस्वामीक्षुधस
क्रांतोप्यस्मान्वक्तिन किंचन तदस्मात्मप्रदानोत्त्वाप्रियंकुर्मोयथावयं तथात्वमपिकुर्वीयायेनासौप्रीयतेत्वयिः।
इत्युक्त्वावायसेनोष्ट्रःसाधुस्तत्प्रत्यपद्यत उपाययौचतंसिंहंसहकाकेनतेनसः ततःकाकोब्रवीद्देवस्वायत्तंभु
क्ष्वमामिमं किंत्वयासत्यकायेनेत्युक्तेसिंहेनजंबुकः मांभुंक्ष्वेत्यवदःतंचसतथैवनिराकरोत द्वीपांततोब्रवी
भुंक्ष्वमांदेवेतितमप्यसौ नभुंक्तेहरिरुष्ट्रोत्रबभाषेभुंक्ष्वमामिति वाक्छलेनसतेनैवहत्वा तत्वाचखंडशः
उष्ट्रस्तैर्भक्षितःसद्यःससिंहैर्वायसादिभिः एवंकेनापिपशुनेनैवपिंगलकोमयि प्रेरितोऽकारणंराजाप्रमा
णामधुनाविधिः गृध्रोपिहिवरंराजासेव्योहंसपरिच्छदः नगृध्रपरिवारस्तुहंसोपिकिमुतापरं एतत्संजीवका
बुत्वावादीद्दमनकोन्तजुः धैर्येणासाध्यतेसर्वंमृणवप्यत्रतेकथां कोप्यंसौटिट्टिभःपक्षासभार्योवारिधेस्त
टे धृतगर्भासतीभार्याटिट्टिभीचजगादतं एहिक्वाप्यन्यतोयामःप्रसूतायांमयीहहि हरेदप्यानंभोधिः
कदाचिदयमूर्मिणा एतदार्याविचःश्रुत्वाटिट्टिभःसजगादतां शक्नोतिनमयासाकंविरोधंकर्तुमंबुधिः।
तबुत्वाटिट्टिभीप्राहमैवंकातेतुलाब्धिना हितोपदेशोनुष्ठेयोविनाशःप्राप्यतेन्यथा तथाचकंबुग्रीवा

राम
२१

स्मः क्वापिकूर्मः सरस्यभूत्॥ तस्यास्तांसुहृदौहंसौनाम्नाविकटसङ्कटौ एकदावग्रहक्षीणजलेसरसितत्रतौ हंसाव
११२ न्यसरोगंतुंकामौकूर्मोजगदतुः युवांयत्रोद्यतौगंतुंनयतंतत्रमामपि तच्छ्रुत्वातावुभौहंसौकूर्मंतंमित्रमूचतुः स
रोहृदाद्वीयस्तद्यत्रावांगंतुमुद्यतौ तत्रागंतुंतवेगावेकार्य्यमस्मद्वचस्त्वया अस्मद्धृतांगृहीत्वैतांदंतैर्यष्टिंदिविव्र
जन् निरालापोवतिष्ठेथाभ्रष्टोव्याप्स्यसेन्यथा तथेतितेनदंतात्तयष्टिनासहतौनभः कूर्मेणोत्पेतनुर्हंसौप्रां
तयोरात्तयष्टिकौ क्रमाद्वतस्सरोर्म्यर्णंप्राप्तौतौकूर्महारिणौ ददृशुस्तदधोवर्त्तिनगराश्रयिणोजनाः किमेतन्नीयते
चित्रंहंसाभ्यामितितैर्जनैः क्रियमाणंकलकलंसकूर्म्मश्चपलोशृणोत् कुतः कलकलोधस्तादितिवक्त्राद्विहायतां यष्टिं
चपलन्हंसौतौभ्रष्टोजघ्नेजनैर्भुवि एवंबुद्धिच्युतोनश्येत्कूर्मोयष्टिच्युतोयथा इत्थंतयोक्तः टीट्टिभ्याटीट्टिभस्सजगादतां
सत्यमेतत्प्रियेकिंतुत्वमप्येकांकथांशृणु नद्यंतःस्थेह्रदेभूवन्क्वापिमत्स्याःपुरात्रयः अनागतविधातेकःप्रत्युत्पन्नम
तिस्तथा द्वितीयोयद्भविष्यश्चतृतीयःसहचारिणः तेदासानांवचोजातुतेनमार्गेणगच्छतां अहोअस्मिन्ह्रदेमत्स्याः
संतीतिकिलशुश्रुवुः तेनांशंकावधंदाशैर्नदीस्रोतःप्रविश्यसः अनागतविधाताथबुद्धिमानन्यतोययौ प्रत्युत्प
न्नमतिस्त्वासास्तत्रैवाविकंपितः अहंप्रतिविधास्यामिभयंचेदापतेदिति यन्मेभविष्यतीत्यासीद्यद्भविष्यस्तुतत्र
सः अथागत्यक्षिपंजालंतत्रतेधीवराह्रदे जालेक्षिप्तस्तुतैःसद्यःप्रत्युत्पन्नमतिःसुधाः स्तब्धानिःस्पंदमात्मानंति

पं०के०१०
२२
22

वतिसमस्तोयथा स्वयंमृतोयमितितेश्चप्रसुतिमिधातिषु पतिवासनदास्त्रोतस्यगरुडुतमन्यतः यद्गविष्या-
सुजालस्यउद्वर्तनविवर्तते कुर्वन्गृहीत्वानिहतोमंदबुद्धिःसधीवरैःतस्याप्रतिविधास्येहंतयास्याम्बुधेर्भ
यात् इत्युक्त्वाटिट्टिभोभार्यातत्रैवास्मीस्वनीडके तत्राश्रौषीद्वचस्तास्यसाहंकारंमहोदधिः दिवसैश्चप्रसूतासा
तद्भार्यातत्रटिट्टिभा जहारसततोंडानितस्याजलधिरूर्मिणा पश्यामिटिट्टिभोयंमेकिंकुर्यादितिकौतुकात्ः
प्रास्तंतदैतद्व्यसनंयन्मयोक्तमभूत्तव इत्याहरुदतीसातंटिट्टिभीटिट्टिभंततः ततःसटिट्टिभोधारस्तांस्वभार्यामभा
षत पश्येहकिंकरोम्यस्यपापस्यजलधेरहं इत्युक्त्वापक्षिणःसर्वान्संन्हयावुष्योक्तेतिवा गत्वातैःसहचक्रेदशरणं
गरुडंप्रभुं अब्धिनांडापहरेणवयंनाथेत्वयिसति अनाथवत्पराभूताइत्यूचुस्तेचतंखगाः ततःक्रुद्धेनतार्क्ष्ये
णविज्ञप्तोहरिरंबुधिं आग्नेयास्त्रेणसंशोष्याटिट्टिभांडान्यदापयत् तस्मात्दत्पक्षधैर्येणाभावमापरिधामता
उपस्थितमिदानींतुयुद्धंपिंगलकेनते यदैवोक्षिप्तलांगूलश्चतुर्भिश्चरणैःसमं उत्थास्यतिसतेविद्याःप्रजिहीर्षुतिदै
वतं सज्जोभूतशिराभूत्वाश्रृंगाभ्यामुदरेवतं हत्वाभिपतितंकुर्याकीर्णान्त्रनिकरंरिपुं एवमुक्त्वादमनकःसंजीव-
कवृषभंसतं दत्वाकरटकायोभौसिद्धभेदौशशंसतौ ततःसंजीवकःप्रायात्शनैःपिंगलकांतिकं जिज्ञासुरिंगि
ताकारैश्चित्तंतस्यमृगप्रभोः ददर्शोत्क्षिप्तलांगूलंयुयुत्सुंतंसमांघ्रिकं सिंहंसिंहोप्यपश्यत्तंसशंकोभूतमस्तकः। राम २२

ततःप्राहरदुत्पत्यससिंहोस्मिन्वृषेनवैः वृषोपितस्मिन्शृंगाभ्यांप्रावर्त्तिष्टाहवस्तयोः तच्चदृष्ट्वादमनकंसाधुक
रटकोब्रवीत् किंस्वार्थसिध्यैव्यसनंप्रभोस्त्वयादितंत्वया संपत्प्रजानुतापेनमैत्राशाठ्येनकामिनी पारुष्येणाहृता
मित्रनचिरस्थायिनीभवेत् अलंवाबहुयोब्रूतेहितवाक्यावमानिनः सतस्माल्लभतेदोषंकपेःसूचीमुखयथा सर्व
मासन्वनेकापिवानरायूथचारिणः तेशीतेजानुखद्योतंदृष्ट्वाग्निरिमेनिरे तस्मिंश्चतृणपर्णानिविन्यस्यांगमतापय
यत् एकस्तुतेषांखद्योतमाधमंतंसुखानिलैः तद्दृष्ट्वातत्रतंप्राहपक्षीसूचीमुखाभिधः नैषोग्निरेषखद्योतोमाक्ले
शमनभरिति तच्छ्रुत्वाप्यनिवृत्तंतंपक्षीसोभ्येत्यवृक्षतः न्यवारयद्यन्निर्बंधात्कपिस्तेनचुकोपसः क्षिप्तयाशिलया
तंचसूचीमुखमचूर्णयत् तस्माततस्यवक्रस्यंयःकुर्यान्नहितंवचः अतःकिंवच्मिदोषायमेदस्तावन्नृतस्त्वयाः
दुष्टयाक्रियतेयच्चबुध्यातन्नशुभंभवेत् तथाचाभवतांपूर्वंभ्रातरौद्वौवणिक्सुतौ धर्मबुद्धिस्तथादुष्टबु
द्धिश्चवनपत्तने तावर्थार्थेपितुर्गेहाद्गताद्देशांतरंसह कथंचित्स्वर्णदीनारसहस्रद्वयमापतुः तद्गृहीत्वास्वनग
रंपुनराजग्मतुश्चतौ वृक्षमूलेचदीनारान्भूतलेतान्निचख्नतुः शतमेकंगृहीत्वावदीनाराणांविभज्यच परस्प
रंसमांशेनतस्थतुःपितृवेश्मनि एकदादुष्टबुद्धिःसगत्वातस्तलात्ततः एकएवाग्रहीत्सर्वंदीनारांस्तानसच्छयीः
मासमात्रेगतेतंचधर्मबुद्धिमुवाचसः एह्यार्यविभजावस्तान्दीनारान्नास्तिमेमयः तच्छ्रुत्वाधर्मबुद्धिस्तांगत्वा

पं०के०१०
२३
23

भूमिंतथेतिसः चखानतेनैवसमंदीनारान्पत्रतान्यधात् संप्राप्तानयदातेचदीनाराःखातेकात्ततः ततःसदुष्टबु
द्धिस्तंधर्मबुद्धिंशवोब्रवीत् नीतास्तेभवतातन्मेसमर्द्धंदीयतामिति नतेनीतामयानीतास्त्वयेत्याहसतंततः
एवंप्रवृत्तेकलहेसोश्मनाताडयद्भिरः दुष्टबुद्धिराजकुलंधर्मबुद्धिंनितायतं तत्रोक्तःस्वस्वपक्षौताबायनासा
त्रितनिर्णयैः स्थापितावादिनबेदमुभौराजाधिकारिभिः यस्यमूलेन्यधीयंतदीनारास्तेवनस्पतेः ससाक्षीवर्त्ति
तन्नीतास्तेमुनाधर्मबुद्धिना इत्युवाचाथतान्दुष्टबुद्धीराजाधिकारिणः प्रक्ष्यामस्तर्हितंप्रातरित्यूचुस्तेपिविस्मि-
ताः ततस्तैर्द्धर्मबुद्धिश्चदुष्टबुद्धिश्चतावुभौ दत्तप्रतिभुवौमुक्तौविनितौजग्मतुर्गृहं दुष्टबुद्धिश्चवस्तूक्तेदितो
र्थपितरंरहः भवमेवृक्षगभातस्थित्वासाक्षात्वभाषाततः बाढमित्युक्तेवंततंनीवामहतिकोटरे निवेश्यततंतरौतत्र
रात्रौसगृहमाययौ प्रातश्चराजाधिकृतैःसहतौभ्रातरौतरुं गत्वापप्रच्छतुःकस्मान्दीनारान्नीतवानिति दीनारा-
न्धर्मबुद्धिस्तान्नीतवानितिसस्फुटं तद्वृक्षकोटरांतस्थःस्ततोभाषततत्पिता तदसंभाव्यमाकर्ण्यनिश्चितंदुष्ट
बुद्धिना अत्रांतःस्थापितःकोपीत्युक्त्वाधिकृतकाश्चते तरोर्गर्भेदधुर्धूमंयेनाध्मानःसनिस्सरत् निपत्याधोग
जा२ तःक्ष्मायांदुष्टबुद्धिपितामृतः तद्दृष्ट्वावस्तुबुध्वाचराधिकृतकैःसतैः दापितोदुष्टबुद्धिस्तान्दीनारान्धर्मबुद्ध
ये निकृत्तहस्तजिह्वश्चतैश्चनिर्वासितस्ततः दुष्टबुद्धिर्यथार्थाख्योधर्मबुद्धिश्चमानितः एवमन्याय्ययाबुध्या राम

त्वतं कर्माशुभावहं तस्मात्तन्न्यायपथात्कुर्याद्विनाहेः त्वतं यथा पूर्वं बकस्य कस्यापि जातं जातमभक्षयत्
भुजगोपस्य समागत्य ससंतेपे ततो बकः कुंभोपदेशात्तेनाथ बकेन नकुलालयात् आरभ्याहिबिलं यावन्म
त्स्यमांसं कार्यत निर्गत्य नकुलस्तत्सुखाद्स्तदनुसारतः दृष्ट्वा बिलं प्रविष्टस्तं सापत्यमवधीदहिं एवं भवतु
पायेन कार्यमन्यच्च मे शृणु आसीत्कोपितुलाशेषः पित्रार्थात्प्राग्वणिक्सुतः अयस्पलसहस्रेण घटितां तां
तुलां वसः कस्यापि वणिजो हस्ते न्यस्य देशांतरं ययौ आगतश्च ततो यावत्तस्मान्मार्गति तां तुलां आखु
भिर्भक्षितामेति तावत्तं सोब्रवीद्वणिक् सत्यं सुस्वादु तल्लोहं तेन जग्धं तदाखुभिः इति सोपि तमाह स्म वणि
क्सुतो हसन्हृदि प्रार्थयामास च ततो वणिजोस्मात्स भोजनं सोपि संतुष्यते तस्मै प्रदातुं प्रत्यपद्यतः ततः स
सहस्त्वास्य वणिजः पुत्रमर्भकं स्नातुं वणिक्सुतः प्रायाद्दत्वामलकपात्रकं स्नात्वार्भकं तं निक्षिप्य गुप्तं
क्वापि सुहृद्गृहे एकएवाययौ तस्य सद्धामान्वणिजो गृहं अर्भकः क्वसइत्येवपृष्टं तं वणिजं सतं श्येनेन सोर्भ
को नातः खान्निपत्ये त्युवाच सः मां दिती मे त्वया पुत्र इति क्रुद्धेन तेन च नीतः सं वणिजा राजकुले प्याह स्म त
तथा असंभाव्यमिदं श्येनो नयेत्कथमिवार्भकं इति सभ्यैश्च तत्रोक्ते वणिक्सुतो जगाद सः मूषकैर्भक्ष्य
ते लोही देशे यत्र महातुला तत्र द्विपमपि श्येनो नयेत्किं पुनरर्भकं तद्बुवा कौतुकात्पृष्टवृत्तांतैस्तस्य दापिता॥

क०लं०१० २८ 25

नी१

सभ्येस्तुलासातेनापिसञ्चांयाभर्कोर्पितः इत्युपायेनघटयंत्यभीष्टंबुद्धिशालिनः त्वयात्तुसाहसेनैवसंदेहंप्रापितः
प्रभः एतत्करटकाच्छ्रुत्वावादीद्दमनकोहसन् मैवंकिमुक्षयुद्धेस्तिसिंहस्यजयसंशयः मत्तेभदशनाघातघनव्र
णविभूषणः क्वकेसरीक्वदांतश्चप्रतोदक्षतविग्रहः इत्यादिजल्पतोयावज्जंबुकौतौपरस्परं तावत्संजीवकंवृ
षंयुद्धेपिंगलकोवधात् तस्मिन्हतेसकिलपिंगलकस्यतस्यपार्श्वेसमंकरटकेनमृगाधिपस्य तस्थौततोदमन
कोमुदितश्चिरायमंत्रित्वमप्रतिहतंसमवाप्यभूयः इतिनरवाहनदत्तोनातिमतीबुद्धिविभवसंपन्नां मंत्रीव
राद्गोमुखतःश्रुत्वाचित्रांकथांजहर्षभृशं इतिश्रीभट्टसोमदेवविरचितेकथासरित्सागरेशक्तियशोलंबकेच
तुर्थस्तरंगः ॥ ४ ॥ आदितःषष्टितमस्तरंगः ६० ततःशक्तियशःसोत्कंगोमुखःसविनोदयन् नरवाहनद
त्तंतंमंत्रीपुनरभाषत श्रुताप्राज्ञकथादेवत्वयामुग्धकथांशृणु मुग्धबुद्धिरभूत्कश्चिदाढ्यस्यवणिजःसुतः
जगामसवणिज्यायैकटाहद्वीपमेकदा भांडमध्येचतस्याभून्महानगुरुसंचयः विक्रीतापरभांडस्यनतस्यागुरु
तत्रतत् कश्चिज्जग्राहतद्वासीजनोवेत्तिनतत्रतत् काष्ठिकेभ्यस्ततोगारान्दृष्ट्वाविक्रीणतोजनात् सकालागुरु
जग्ध्वातदंगारानकरोज्जडः विक्रीयांगारमूल्येनतच्चागत्यततोगृहं तदैवंकौशलंशंसन्स्वययौलोकहास्यतो
कथितोगरुदासोयंश्रूयतांतिलकार्षिकः बभूवकश्चिद्ग्रामीणोभूतप्रायःकृषीबलः सकदाचित्तिलान्भ्रष्टा

राम २८

भुक्त्वास्वादून वेत्स्यतान् भ्रष्टानेवावपद्रीस्तादृशोत्पत्तिवांछया भ्रष्टेषु तेष्वजातेषु नष्टार्थं तजनोहसत् तिल
कार्षिक उक्तो मो जलेग्निक्षेपकं शृणु मंदबुद्धिरभूत्कश्चित्पुमान्निशि स चैकदा प्रभाते देवतार्चां करिष्यन्नि
त्यचिंतयत् उपयुक्तौ मम स्नानधूपार्घार्थं जलानलौ स्थापयामि तदेकस्थौ तौ शीघ्रं प्राप्नुयां यथा इत्यालो
च्यांबुकुंभांभः क्षिप्त्वाग्निं स विवेश सः प्रातश्च प्रेक्षते यावद्गतोग्निर्नष्टमंबु च अंगारमलिने दृष्टे तोये तस्या
भवन्मुखं तादृगेव स हासस्य लोकस्यासीत्पुनः स्थितं श्रुतस्त्वयाग्निकुंभाख्यो नासिकारोपणं शृणु बभूव कश्चि
त्पुरुषो मूर्खो मूढमतिः क्वचित् स भार्यां चिपिटघ्राणां गुरुं चोत्तुंगनासिकं दृष्ट्वा तस्य प्रसुप्तस्य नासां छित्वाग्रही
द्गुरोः गत्वा च नासिकां छित्वा भार्यायास्तामरोपयत् गुरुनासा मुखे तस्या न च तत्र रुरोह सा एवं भार्या गुरू तेन
छिन्ननासावुभौ कृतौ अधुना वनवासी च पशुपालो निशम्यतां पशुपालो महामूढः कोप्यासीद्धनवान्वने।
तस्य धूर्ताः समाश्रित्य मित्रत्वे बहवो मिलन् तेतं जगदुराढ्यस्य सुता नगरवासिनः त्वत्कृते याचितास्माभिः
सा च पित्रा प्रतिश्रुता तद्धुत्वा स ददौ तुष्टस्तेभ्योर्थं तं च ते पुनः विवाहस्तव संपन्न इत्यूचुर्दिवसैर्गतैः ततः
स सुतरां तुष्टस्तेभ्यो भूरि धनं ददौ दिनैश्च तं वदंति स्म पुत्रो जातस्तवेति ते ननंद तेन सर्वं च मूढस्तेभ्यः समर्प्य
सः पुत्रं प्रत्युत्सुकोस्मीति प्रारोदीच्चापरेहनि रुदंश्चारत्तलोकस्य हासं धूर्तैः स वंचितः पशुभ्य इव संक्रांतज

व०क०१०
२५
25

डिमाथ भुपालकः पशुपालः श्रुतो देव श्रृणु खलंकारलंबकं ग्राम्यः कश्चिच्च तद्भूमिंप्राप्यालंकारणंमहत् राज्ञोरा
जकुलाद्घोरैनीवातत्र निवशितं तद्गृहीत्वासतत्रैव भार्यांतांतैरभूषयत् बबंधमेखलामूर्द्धिहारं च जघनस्थ
ले नूपुरौकरयोस्तस्याः कर्णयोरपिकंकणौ हसद्भिःख्यापितंलोकैर्बुध्वाराजाजहारतत् तस्मात्स्वाभरणंतंतुप
शुप्रायंमुमोचसः उक्तोलंकारणीदेवश्रृणुवच्म्यत्रमूलिकं मूर्खःकश्चित्तुमांस्तूलविक्रयायापणंययौ अशु
द्धमितिततस्यनजग्राहात्रकश्चन तावद्ददर्शतत्राग्नौहेमनिक्षिप्तशोधितं स्वर्णकारेणविक्रीतंगृहीतंग्राहकेण
च तद्दृष्ट्वापिसततूलमिच्छंशोधयितुंजडः अग्नौचिक्षेपदग्धेपितस्मिंल्लोकोजहासतं श्रुतोयंतूलकोदेवख
र्जूरीभेदकंश्रृणु केचिन्मूर्खाःसमाहूयनियोज्यंताधिकारिभिः ग्राम्याराजकुलाद्दिष्टाःखर्जूरानयनंप्रति।
तेदृष्ट्वा।कांसुखग्राह्यांखर्जूरीपतितांस्वतः खर्जूरांतत्रखर्जूरीस्सर्वाग्रामेस्वकेछिदन् पतितास्ताश्चकलितश्श
षैःखर्जूरसंचयैः उत्थाप्यारोपयामासुर्नैवेषांसिध्यतिस्मतत् ततश्चानीतखर्जूराश्चाटतारोपणेनते खर्जूरी
छेदनंबुध्वाराज्ञाधत्तुतदंडिताः उक्तःखर्जूरहासोयंनिधानालोकनमुच्यते निधानदर्शिकेनापिकोप्याजहेम
हिभुजा मागात्क्वापिपिजाद्ध्यायमितिराजकुमंत्रिणा नेत्रेतस्योदपाद्येतीनिधानस्थानदर्शिनः भूलक्षणा
न्यपश्यंतंगतावप्यगतोसमं अंधदृष्ट्वाचतन्मंत्रीसजडोनहसेजनैः निधानालोकनंश्रुत्वाअमूयतैलवण

राम
२५

शनं बभूव गह्वरग्रामवासी कोपि जडः पुमान् स समित्रेण गृहं जातु नीतो नगरवासिना भोजितो लवणस्वादून्य
न्नानि व्यंजनानि च केनेयं स्वादुता भादे इत्यपृच्छत्स गह्वरः प्राधान्याल्लवणेनेति तेनोचे सुहृदा तदा तदेव तर्हि
भोक्तव्यमित्युक्त्वा लवणस्य सः पिष्टस्य मुष्टिमादाय प्रक्षिप्याभक्षयन्मुखे तच्चूर्णं तस्य दुर्बुद्धेरोष्ठौ श्मश्रूणि चा
लिपत् हसतस्तु जनस्यास्य मुखं धवलतां ययौ लवणाशी श्रुतो देव त्वया गोदोहकं शृणु ग्राम्यः कश्चिदभून्मुग्धा
गौरेका तस्य चाभवत् सा च तस्यान्वहं धेनुः पयः पलशतं ददौ कदाचिच्चाभवत्तस्य प्रत्यासन्नः किलोत्सवः एकवा
रं ग्रहीष्यामि पयोस्याः प्राज्यमुत्सवे इति मूर्खः स नैवैतां मासमात्रं दुदोह गां प्राप्तोत्सवश्च यावत्तां दोग्धि तावत्पयोखि
लं तस्यास्तच्छिन्नमभिन्नं लोकस्य हसितं बभूत् श्रुतो गोदोहको मूर्खः श्रूयतामपराविमौ खल्वतिस्ताम्रकुंभाभ
शिराः कश्चिदाभूत्पुमान् वृक्षमूलोपविष्टं तं तरुणः कश्चिदैक्षत आगतोत्र कपित्थानि गृहीत्वा क्षुधितः पथ
स कपित्थेन तत्रास्य क्रीडयाताडयच्छिरः खल्वतिः सोपि तत्सेहे न तस्यावाच किंचन ततोन्यैः क्रमशः सर्वैः स कपि
त्थैरताडयत शिरस्तस्य स चातिष्ठत्तूष्णीं रक्तेस्रवत्यपि सोथ निष्फलतारुण्यस्तत्क्रीडाविचूर्णितैः विनाकपि-
त्थैः क्षुधार्तो ययौ मूर्खयुवा ततः कपित्थैः स्वादुभिः सेहे किं न घातानिति ब्रुवन् स खल्वाटो गलद्रक्तशिरा मूर्खो
ययौ गृहं मूर्खसाम्राज्यबद्धेन पट्टेन चिह्नितं शिरः रक्तेन तस्य तद्दृष्ट्वा हसति स्म न तत्र कः एवं देवोपहास्यत्वं लो

वृ०क०१०
२६

केगबंत्यबुद्धयः लभंतेतार्थसंसिद्धिं हृज्यंतेचसुबुद्धयः इतिगोमुखतःश्रुत्वामुग्धाहासकथाइमः नरवाहनद
त्तःस्वमुत्थायव्यधितान्हिकं निशागमेपुनस्तेननियुक्तश्चोत्सुकेनसः गोमुखःकथयामासप्राज्ञतिर्श्चांकथा
मिमां अभूत्क्वापिवनोद्देशेमहा॰॰शाल्मलिपादपः उवासत्वलघुपातीतिकाकस्तत्रकृतालयः सकदाचि
त्तन्नीडस्थोददर्शात्ततरोरधः जालहस्तंसलगुडंरौद्रंपुरुषमागतं ततःसवीक्षतेयावत्काकस्तावद्वितत्य
सः जालंभुविविकीर्यात्रव्रीहीन्प्रच्छन्नोभवत्पुमान् तावच्चचित्रग्रीवाख्यःपारावतपतिर्भ्रमन् तत्राजगाम
नभसापारावतशतैर्वृतः सव्रीहिप्रकरंदृष्ट्वाजालेत्राहारलिप्सया पतितःपाशनिकरैर्बद्धोभूत्सपरिच्छदः तद्दृष्ट्वा
वानुगांसर्वांश्चित्रग्रीवोजगादसः गृहीत्वाचंचुभिर्जालंखमुत्पतवेगतः ततस्तथेतितेजालमादायोत्पत्यवे
गतः कपोतानभसागंतुभीताःप्रारेभिरेखिलाः सोप्युर्ध्वापोद्विग्नोलुब्धकसन्न्यवर्त्तत निर्भयोथजगादैतां
श्चित्रग्रीवोनुयायिनः मन्मित्रस्यहिरण्यस्यमूषकस्यांतिकंद्रुतं व्रजामःसइमान्पाशांछित्वास्मान्मोचयिष्य
ति इत्युक्त्वासोनुगैःसाकंगत्वातैर्जालकर्षिभिः मूषकस्यविलद्वारंतस्याकाशादवातरत् भोभोहिरण्यनिर्या
हिचित्रग्रीवोहमागतः इत्याजुहावतंतत्रमूषकंसकपोतराट् सश्रुत्वाद्वारमार्गेणदृष्ट्वातंचागतंतथा सुहृ
दंनिर्ययावाखुस्तस्मात्स्वमुखाद्विलात् उपेत्यदृष्ट्वावृत्तांतंसंभ्रमात्सोस्यमूषकः पारापतपतेःपाशान्सानुगस्या

राम
२६

छिन्नसुहृत् छिन्नपाशातमामंत्र्यमूषकंवचनैःप्रियैः चित्रग्रीवःस्वमुत्पत्यस्वपययौसोनुचरैःसह अन्वागतःस
काकोत्रलघुपानीविलोक्यत विलप्रविष्टं तं द्वारमागत्योवाचमूषकं लघुपातीतिकाकोहं दृष्ट्वा त्वां मित्रत्वंस
ल मित्रत्वायवृणोमाहृविपदुद्धरणाक्षमं तच्छ्रुत्वाप्यंतरां दृष्ट्वामूषकस्तंतवायसं जगादगच्छकामैत्रीभक्ष्य
भक्षकयोरिति ततःसवायसोवादीद्भक्षितंभुक्ते ममत्वयि तृप्तिःक्षणंस्यान्मित्रेतुशश्वज्जीवितरक्षणं इत्याद्युक्त्वा
सशपथंतेनाश्वासंचतेनसः निर्गतेनाकरोत्सख्यमाखुनासहवायसः समांसपेशीरानैषीदाखुःशालिकणानपि एक
कत्रसहभुंजानौतस्थतुस्तावुभौसुखं एकदासचकाकस्तंमित्रंमूषकमब्रवीत् इतोविदूरेमित्रास्तिवनमध्यग
तानदी तस्यांमथरकोनामकूर्मश्चास्तिसुहृन्मम तदर्थयामितत्स्थानंसुप्रापामिषभोजनं त्वत्प्राप्यइहाहारो
नित्यंव्याधभयंचमे इत्युक्तवंतंमूषकोपिजगादसः सहैवतर्हिवस्यावोनयतत्रैवमामपि ममाप्यस्तीहनि-
काकंतं५ र्वेदोवक्ष्येतत्रैवतंचते इतिवादिनमादायचंचूत्वातसहिरण्यकं रभसालघुपातीतद्ययौवननदीतटं मिलित्वा
सहकूर्मेणातत्रमंथरकेनसः त्वातातिथ्येनमित्रेणासतस्थौमूषकान्वितः कथांतरेचकूर्मायतंतस्मैस्वागमकारणं
देशनिर्वासनिर्वेदहेतुंयपप्रच्छमूषकं हिरण्यसख्यवृत्तांतयुतंकाकःशशंससः ततःसकूर्मस्तंत्वामित्रंवायस
संस्तुतं ततोहिरण्यःसतयोरुभयोःकाककूर्मयोः श्रावतोनिजवृत्तांतमेताकथोमवर्णयत् अहंमहाविले

तत्रनगरासन्नवर्त्तिनि वसन्राजकुलद्वारमानीयास्थापयंनिशि दृश्यमानेनहारेणतेनजातोजसंभ्रमां सम
र्थमन्नाहरणेमूषकाःपर्यवारयत् अत्रांतरेचतत्रागात्कश्चिदस्मद्विलांतिके परिव्राण्मठिकांत्यक्त्वानानाभि
क्षान्नवृत्तिकः सभुक्तशेषंभिक्षान्नंनक्तंस्थापयतिस्मतत् भिक्षाभांडस्थमुल्लंघ्यशंकोप्रातर्जिघक्षया मु
पस्यात्रचतस्याहंबिलेनांतःप्रविश्यतत् दत्तोर्द्धपातोनिःशेषमनैषंप्रतियामिनि कदाचित्तत्रतस्यागात्सुहृत्प्र
व्राजकोपरः भुक्तोत्तरसमंतेनकथांगात्रेोसचाकरोत् तावन्नेतुंप्रवृत्तेतंमयिजर्ज्जरकेणासः प्रव्राड्वाद्यहृत्ते
कर्णास्तभांडकंमुहुः कथामाविघ्नकिमिदंकरोषीतिसतेनच आगंतुनापरिव्राजापृष्टःप्रव्राडमभ्यधात् इहमेमू
षकःशत्रुरुत्पन्नोयंसदैवयः अपिदूरस्थमुत्पत्यनयत्यन्नमितोमम तन्नाशयामिवलयंजर्ज्जरेणान्नभाजनं
इत्युक्तवंतंप्रव्राजपरिव्राड्घोपतोब्रवीत् लोभोनामैषजंतूनांदोषायात्रकथांशृणु तीर्थान्यहंभ्रमन्प्रापमेकं
नगरमेकदा तत्रचैकस्यविप्रस्यनिवासायाश्रयंगृहं स्थितेमयिसविप्रश्चवदतिस्मस्वगेहिनीं॥त्वसरान्ब्राह्म
णान्नतेपर्वण्यपघयचेरिति कृतस्तेनिर्द्धनस्यैतदित्यवोचत्तंसापितं ततःसविप्रोवादीत्तांप्रियेकार्यंपिसं
चये नातिसंचयधीःकार्याशृणुचैवकथामिमां वनेक्वापित्वताखेटोव्याधोयंत्रितसायके आदायमा
संधनुविप्रधावस्सूकरंप्रति तेनैवकांडविद्धेनसहतःपोत्रविक्षतः सप्यपद्यततत्रांचत्कृतादेक्षतजंबुकः राम

सचागत्यसुधान्तोपिचिकीर्षुःसंचयायतत् क्रोडस्थाधान्यभिक्षां किंचिन्नचखादतिभूयसः भोक्तुंप्रवर्त्ततेतत्तु गवा
धनुप्रियस्थितं तच्छ्रुत्वाचोवृत्वल्पघंत्रशारविद्धोममाससः तन्नातिसंचयःकार्यइतितेनद्विजेनसाः भार्योक्ताप्र
तिपर्यैतन्तिलानक्षिपन्नातपे प्रविष्टायांगृहंतस्यांप्रान्चश्वातानरूषयत् ततोनत्तशालांनेतान्कश्चिन्मूल्यादिनागृ
हीत् तदेवंनोपभोगायलोभःक्लेशायकेवलं इत्युक्त्वापुनराहस्मप्रव्राडागंतुकोयमसः खनित्रमस्तिचेत्तन्मेदीय
तांयावदद्यच पुक्वानिवारयाम्येतंमूषकोक्षमुपद्रवं तच्छ्रुत्वातन्निवासीचप्रव्राडस्मैखनित्रकं ददाव
हं चब्रह्मन्नस्तुस्तद्दृष्ट्वाप्रविशंबिलं ततस्तेनखनित्रेणप्रव्राडागंतुकोत्रसः मत्संवारविलंवीक्ष्यप्रारेभेखनितुंश
ठः क्रमाच्चताचदरखनत्पलायनपरोमयि यावत्तंप्रापतत्रस्थंहारंमेधान्यसंचयं तेजसानेनतस्याभूद्दारवोस्त
तादृशंबलं इत्याहस्माऽतिनंतंचप्रव्राजंमयिभ्रष्टएवति नीवाचतन्मेसर्वस्वंहारंमूर्ध्निविधायच आगंतुस्तदायि
नोत्तष्टोप्रव्राजौस्वपतश्चतौ प्रसुप्तयोस्तयोस्तंचहर्तुंमांपुनरागतं प्रबुध्यातातउपघट्याप्राव्राट्स्तायीसमू
र्द्धनि तेनाहंव्रणितोदैवान्नमृतोबिलमाविशं भूयश्चशक्तिर्नाभून्मेतदन्नाहरणस्तवे अर्थोहियौवनंपुं
सांतदन्तावश्चवार्द्धकं तेनास्योजोबलंरूपमुत्साहश्चापिहीयते अथात्ममात्रभरणेयत्नवंतमवक्षमां
परित्यज्यगतःसर्वःसमवक्तपरिच्छदः अहत्तिकंप्रभुंभृत्याःअपुष्पंभ्रमरास्तरुं अजलंचसरोहंसामुंचंत्यपि

विरोधितः इत्थंतत्रचिरोद्विग्नः सुहृदृलघुपातिनं प्राप्येतंकच्छपश्रेष्ठवत्यार्द्धमहमागतः एवंहिरण्यकेनोक्ते कूर्म्मो-
मंथरकोभ्यधात् स्वमेवस्थानमेतत्कैतन्मामित्राधृतिंत्यथाः गुणितोनविदेशोस्तिनसंतुष्टस्यचासुखं धीरस्यचवि
पन्नास्तिनासाध्यंव्यवसायिनः इतितस्मिन्वदत्येवकूर्मेचित्रांगसंज्ञकः हातोव्याधसंत्रस्तोमृगस्तद्वनमाययौ तं
एष्ट्वातस्यदृष्ट्वाचपश्चाद्व्याधमनागतं आश्वासितेननतेनैवसख्यंकूर्म्मादयोव्यधुः व्यवसंस्तेततस्तत्रकाकूर्ममृगा
खवः परस्परोपचारेणसुखिताःसुहृदःसमंएकदाकाकोपिचित्रांगंविरायातंतमीक्षितुं आरुह्यतरुंतमेक्षिष्टलघुपाती
सतद्वनं ददर्शचनदीतीरेकालपाशेनसंयुतं चित्रांगमवरुध्येतमवदच्चास्वुकूर्मयोः ततःसंमंत्र्यचंज्ञातंगृहीत्वा
तुहिरण्यकं चित्रांगस्यांतिकंतस्यलघुपातीनिनायतं हिरण्यःसचतंबद्धविधुरंपूर्वकोमृगं क्षणादमुंचद्दाश्वा
स्यदशनच्छिन्नपाशकं तावन्मंथरकोभेत्यनदीमध्येनकच्छपः आरुरोहतटंतेषांनिकटंससुहृत्प्रियः तल्लग्नांसकु-
तोप्येत्यलुब्धकःपाशदायकः विद्रुतेषुमृगाद्येषुलब्ध्वांतंकूर्ममग्रहीत् क्षिप्त्वाचजालिकांतस्ययावन्नश्यन्मृगा-
कुलः सयातितावद्दृष्ट्वातंदीर्घदृष्ट्वाखुवाक्यतः मृगोगत्वाततोदूरेपतित्वासीन्मृतोयथा काकस्तुमूर्छितस्यासीच्च
क्षुषापाटयन्निव तद्दृष्ट्वासगृहीतंतंव्याधोगत्वामृतंमृगं गंतुंप्रववृतेतेनघास्तरेकूर्मंनिधायतं यांतंदृष्ट्वातममध्ये
त्यमूषकस्तस्यजालिकं कूर्मस्यसोच्छिनत्तेनमुक्तोनद्यांपपातसः मृगोपिनिकटीभूतंव्याधंवीक्ष्यविकल्पपः

उच्चाय स पलाय्यागात्काकोप्यारुरुह वांस्तरुं एत्य पापोथ तं कूर्मं बंधछेदपलायिनं अप्राप्योभयविभ्रष्टो दैवशोचा-
न्नगाद्गृहं ततो मिलति स्मैकत्र हृष्टाः कूर्मादयोत्र ते मृगस्तु प्रातिमामेवं कूर्मादीन्नुवाच सः पुण्यवानस्मि यत्प्रा-
प्ता भवंतः सुहृदो मया प्राणानुपेक्ष्य ये नैव मृत्योर्घोरादहमुद्धृतः एवं प्रशंसता तेन मृगेन सह तत्र ते अन्योन्यप्रीतिसुखि-
तः काककूर्मादयो वसन् प्रज्ञया साधयंत्येवं तिर्यंचोपि समीहितं प्राणैरपि न मुंचंति ते ह्येवं मित्रमापदि एवं च
श्रेयसी मित्रे ह्यासक्तिर्नांगनासु च ईर्ष्याश्रयत्वादर्थसंतति तथा च श्रूयतां कथा नगरे क्वापि कोप्यासादीर्ष्यावान्पुरुषः
प्रभोः बभूव तस्य भार्या च वल्लभा रूपशालिनी अविश्वस्तो न तां जातु मुमोचैकाकिनीं च सः तस्या हि शालविभ्रंशं चि-
त्रस्थेभ्योप्यशंकत केनाप्यवश्यकार्येण कदाचित्स पुमानथ सहैवादाय तां भार्यां प्रतस्थे विषयांतरं मार्गे स भिल्ला-
टवीमग्रे दृष्ट्वा च तद्भयात् स्थापयित्वा गृहे याम्यवृद्धविप्रस्य तां ययौ तत्र स्थित्वा च सा दृष्ट्वा भिल्लांस्तेनागतान्पथा।
एकेन यूना भिल्लेन सह हृष्टा ययौ ततः तेन युक्ता च तत्पल्लीं यथाकामं चचार सा उत्क्रांतेर्ष्यालुपतिका भग्नसेतु-
रिवापगा तावत्स तत्पतिः त्वाकार्यमागत्य तं द्विजं ग्राम्यं ययाचे तां भार्यां सोपि विप्रो जगाद तं न जानेहं क्व याता
सा जानाम्येतावदेव तु भिल्ला इहागता आसंस्तैः सानीता भविष्यति तापल्ली निकटे चेह तत्र त्वं व्रज सत्वरं ततः प्राप्स्या-
सि तां भार्यामन्यथा मागतिं त्वथाः इत्युक्तस्तेन स रुदन्निंदन्बुद्धिविपर्ययं जगाम भिल्लपल्लीं तां भार्यां चात्र ददर्श

तां सा विहस्य ज्ञातमप्येत्यभीताया पातमब्रवीत् नमे दोषोऽहमानीताभिल्लेनेह बलादिति आयाहि तत्र गच्छावो
यावत्कश्चिन्न पश्यति इति ब्रुवाणां तां गांधं तमुवाच पतिं च सा तस्यागमनवेलेयं भिल्लस्याखेटगामिनः आग
तश्चानुधाव्यैव हन्यात्त्वां मां च स ध्रुवं तत्प्रविश्य गुहामेतां प्रच्छन्नस्तिष्ठ संप्रति रात्रौ च सुप्तं हत्वा तं यास्यावो नि
र्भयावितः एवं तयोक्तः शबयाप्रविश्यासीद्गुहां स तां कोवकाशो विवेकस्य हृदि कामांधचेतसः साथ कुस्त्री गुहांत
स्थमानीतं व्यसनेन तं भिल्लायादर्शयत्तस्मायागताय दिनात्यये स च निष्क्रांतयतं भिल्लः क्रूरकर्मा पराक्रमी प्रातर्हंतु
पाहारार्थं बबंध सुदृढं तरौ भुक्त्वा च पश्यतस्तस्य रात्रौ तत्रार्यया सह सममास्तेव्य सुरतं सुखं सुष्वाप तद्युतः तं दृष्ट्वा सु
प्तमीर्ष्यालुः स पुमांस्तरुसंयतः चंडीस्तुतिभिरभ्यर्च्य ययो शरणमार्तितः साविर्भूय वरं तस्मै तं दत्त्वोयेन तस्य सः तत्ख
ड्गेनैव भिल्लस्य स्वस्त्रबंधो छिन्नबिरं इहदानींहतः पापो मयायमिति सोथ तां प्रबोध्य भार्यां वक्तिस्म सा प्युत्तस्थौ सु
दुःखिताः गृहीत्वा तस्य च शिरो भिल्लस्यालक्षिता निशि ततः प्रतस्थे कुस्त्री सापत्या तेन सहावशा प्रातश्च नगरं प्रा
प्य दर्शयंती शिरो त्वतत् भर्त्राहतो मे नेनेति चक्रंदाक्रम्य तं पतिं ततस्सनीतस्तद्युक्तो राजाग्रे पुररक्षिभिः एष्ट स्त
त्र यथावृत्तमीर्ष्यालुस्तदवर्णयत् राजाथ तत्वमन्विष्यं छेदयामास कुस्त्रियः तस्याः कर्णौ च नासां च तत्त्यतिं च मुमो
चतं समुक्तः स्वगृहं प्रायात्कुस्त्री स्नेहग्रहोज्झितः एवं हि कुरुते देवयोषिदीर्ष्यानियंत्रिता शिक्षयत्यन्यपुरुषासंगमा

र्यैव हि स्त्रियः तदात्मा न प्रकाश्यैव रक्ष्या नारी सुबुद्धिना रहस्यं न च वक्तव्यं वनितासु यथा तथा पुरुषेणोक्तताक्ष्येपम
त्र तत्श्रूयतां कथा नागः कश्चित्पलाय्यासीत् कुत्रचिद्गणिकागृहे मानुषरूपमास्थाय वैनतेयभयाद्भुवि गणिका
चाग्रहीद्भाटिं सा हस्तिशतपंचकं स्वप्रभावाच्च तत्तस्यै स नागः प्रत्यहं ददौ कुतो न्वहमियंतस्ते वारणा ब्रूहि को भवा
न् इति निर्बंधतः साथ तं पप्रच्छ विलासिनी मा चोचः कस्यचित्ताक्ष्यभयादेवमिह स्थितः नागोहमिति वक्ति स्म सोपि र
तां मारमोहितः सा तदूहसि कुट्टिन्यै शशंस गणिका ततः अथ ताक्ष्यो जगच्चिन्वन्नत्रागात्पुरुषाकृतिः उपेत्य कुट्टिनीं
तां च जगाद त्वत्सुतागृहे अहमद्य वसाम्यार्ये भाटिर्मे गृह्यतामिति इह नागः स्थितो नित्यमिभयं च शतं ददत् त
त्किमेकाह भाटेति कुट्टिन्यपि जगाद तां ततः स गरुडो नागं तत्र स्थितं बुद्ध्वा तं विवेशातिथिरूपेण तद्वारवनितागृहं म ७
तत्र प्रासादपृष्ठस्थं नागं तमवलोक्य सः प्रकाश्यात्मानमुत्पत्य जघान च जघास च अतो न कथयेत्प्राज्ञो रहस्यं स्त्रीषु न ग
लं इत्युक्त्वा गोमुखो मुग्धकथां पुनरवर्णयत् ताम्रकुंभोपमशिराः कोप्यासीत्खलतिः पुमान् स च मूर्खोर्थवां दन्नोके
लज्जते स्म कचैर्विना अथ धूर्तस्तमागत्य कोप्युवाचोपजीवकः एकोस्ति वैद्यो यो वेत्ति कचोत्पादनमौषधं एतद्ब्रुवाः
तमाह स्म तमानयसि चेन्मम ततोहं तव दास्यामि धनं वैद्यस्य तस्य च एवमुक्तवतस्तस्य धनं भुक्त्वा चिरेण सः मुग्ध
स्यानीतवानेकं धूर्तो धूर्त्तं चिकित्सकं उपजीव्य चिरं सोपि खल्वाटस्वं भिषक्छलात् अपास्य वेष्टनं युक्त्या मुग्धायास्मा

क०स०१०
३०
30

यदर्शयत् तद्दृष्ट्वाप्यविमर्षसन्दिग्धं केशार्थमौषधं तं ययाचे स जडधीस्तेन वैद्योब्रवीत्सतं खल्वाटः स्वयमन्यः
स्य जनयेयं कचान्कथं इति ते मूर्ख निर्लोमदर्शितं स्वशिरो मया तथापि त्वं न वेत्स्येव धिगित्युक्त्वा ययौ भिषक्॥
इति दैवसदा धूर्त्ताः क्रीडन्ति जडबुद्धिभिः एवं श्रुतः केशमुग्धस्तैलमुग्धो निशम्यतां मुग्धोभूत्पुरुषः कश्चिद्भृ
त्यः शिष्टस्य कस्यचित् स तेन स्वामिना तैलमानेतुं वणिजोन्तिकं प्रेषितो जातु तत्तस्मात्पात्रे तैलमुपाददे
तैलपात्रं गृहीत्वा तदागच्छंश्चात्र केनचित् ऊचे मित्रेण रक्षेदं तैलपात्रं स्रवत्यदः तच्छ्रुत्वा वेक्षितुमधः पात्र
त्रं तत्स पर्यवर्त्तयत् समूढस्तेन तत्तैलं सर्वं तस्यापतद्भुवि तद्बुध्वा लोकहास्योसौ निरस्तः स्वामिना गृहात् तस्मा
त्स्वबुद्धिमुग्धस्य वरं नत्वनुशासनं तैलमुग्धः श्रुतस्तावदस्थिमुग्धो निशम्यतां अभून्मूर्खः पुमान्कश्चिद्भार्याभ
भूत्तस्य चासती सा तस्मिन्नेकदा पत्यौ कार्याद्देशान्तरं गते दत्तकर्त्तव्यशिक्षां स्वामाप्तां कर्मकरीं गृहे अनन्यदा
सीं संस्थाप्य निर्गत्यैकां ततस्ततः ययावुपपतेर्गेहं निरर्गलमुखेच्छया अथागतं तं तत्पतिं सा दत्तशिक्षाब्रुगरुदं:
कर्मकर्यदद्भार्या मृता दग्धा च सा तव इत्युक्त्वा सा श्मशानं च नीत्वा भस्मोपदर्शयत् अस्थीन्यपि चितास्थानि तान्याहा
यद्दर्शसः सतोदकोथ तीर्थेषु प्रक्षिप्यास्थीनि तानि च प्रावर्त्तत स भार्यायास्तस्याः श्राद्धविधौ जडः सद्विप्र इत्युपा
नीतं कर्मकर्या तयैव चा तमेव भार्योपपतिं श्राद्धं विप्रं चकार सः सेनोपपतिना साकं तद्भार्याप्येत्य तत्र सा उदा

राम
३०

एवंसाभुंक्तेस्ममिष्टान्नंमासितत् सतीधर्मप्रभावेनभार्यातेपरलोकतः पश्चागत्यसमभुंक्तेब्राह्मणेनस्वयंप्रभो इ
तिकर्मकरीसातमवोचत्तत्पतिंयदा तथैवप्रतिपेदेतत्सर्वंमूर्खशिरोमणिः वक्ष्यतेहेलयैवैवंकुस्त्रीभिःसरलाश
याः श्रुतोस्तिमुग्धश्चंडालकन्यकाश्रूयतांत्वया अभूद्रूपवतीकापिमुग्धाचंडालकन्यका सार्वभौमवरप्राप्तौसं
कल्पंहृदिसाकरोत् साराजानंदृष्ट्वाराजानंनगरीभ्रमनिर्गतं सर्वोत्तमंभर्तृबुद्धिरनुयातुंप्रचक्रमे तावदागात्स-
ध्यातेनमुनिस्तस्यप्रणम्यसः पादौराजावरूढःसन्राजास्वभवनंययौ तंदृष्ट्वाराजतोप्येतंविचिंत्यमुनिमुत्तमं चंडा
लकन्याराजानंमुक्त्वासामुनिमन्वगात् मुनिःसोपिव्रजन्नग्रेदृष्ट्वाश्चैवंशिवालयं न्यस्तजानुक्षितौतत्रशिवंनन-
वाययौततः तद्वीक्ष्यसात्यजामत्वामुनेरप्युत्तमंशिवं भर्तृबुध्यमुनिंत्यक्त्वादेवंतत्रैवशिश्रिये क्षणाच्चात्रप्र
विश्यश्वादेवस्याहृद्यपीठिकां जंघामुत्क्षिप्यजानेयस्तदृशंतस्यतद्यधात् तद्विलोक्यात्यजामत्वादेवा नंत-
मुत्तमं यातंतमेवान्वगात्सांत्यक्त्वादेवंपतीच्छया श्वाचागत्यैवचंडालगृहंपरिवितस्यसः चंडालयूनःप्रणा-
यात्लुलोठैकस्यपादयोः तदालोक्योत्तमंमत्वाभुनश्चांडालपुत्रकं स्वजाति तुष्टाचब्रे सातमेवपतिमंत्यजा
एवंत्वंतपदाहूरेपतंतिस्वपदेजडाः एवंचमूर्खराजानंसंक्षेपाच्छृणुतापरं मूर्खःकश्चिद्भूद्राजा त्वपणःकोशवान
पि एकदाजगदुश्चैवंमंत्रिणस्तंशुभोषिणः दानंहरतिदैवेह दुर्गतिंपारलौकिकीं तद्देहिदानमायूंषिभंगुराणि

धनानि च तद्बुद्ध्वा सद्यपो वादीद्यानंदास्याम्यहं ततः दुर्गतिं प्राप्तमात्मानं स्मरतोऽद्य स्यामि चेदिति ततश्चांतर्हसंतस्ते
तस्थामासतमंत्रिणः एवं नोक्तिमयोर्थो न्यावदर्थैः सनोक्षितः राजा सोतः श्रुतो देव मध्यं मित्रद्वयं शृणु बभू
व चंद्रापीडाख्यः कन्यकुब्जे महीपतिः तस्याभवद्धवलमुखाख्यः कोऽपि सेवकः बहिर्भुक्त्वा च पीत्वा च सदैव प्राविश
द्गृहं भुक्तपीतः कुतो नित्यमायासीति स्वभार्यया पृष्टश्च जातु धवलमुखस्तामेवमब्रवीत् सुहृत्पार्श्वादहं शश्व
द्भुक्त्वा पीत्वा च सुंदरि सदैवायामि येनास्ति लोके मित्रद्वयं मम कल्याणवर्मनामैको भोजनाद्युपकारतत् द्वितीयो
वीरबाहुश्च प्राणेभ्योऽप्युपकारतत् एवं श्रुत्वैव धवलमुखो सो भार्यया तया ऊचे मित्रद्वयं तन्मे भवता दर्श्यतामि-
ति ततो ययौ स तद्युक्तस्तस्य कल्याणवर्मणः गृहं सोऽपि महार्हैस्तमुपचारैरपाचरत् अन्येद्युः स ययौ वीरबाहो
र्भार्यायुतोंतिकं स च घूतस्थितः तं वा स्वागतं तं विसृष्टवान् ततोऽब्रवीत्सा धवलमुखभार्या सकौतुका कल्याणव-
र्मा महतीं सत्क्रियामकरोत्तव तं तं स्वागतमात्रं तु भवतो वीरबाहुना तदार्यपुत्र तं मित्रं मन्यसेऽभ्यधिकं कथं तद्बु
द्ध्वा सोऽब्रवीद्गत्वा मिथ्या तौ ब्रूहि भो क्रमात् राजा नः कुपितोऽकस्माद् इति ज्ञास्यस्यथ स्वयं इत्युक्त्वा तेन गत्वैव सा तथै
व तदंतिकं कल्याणवर्मणे वाचम्मश्रुत्वा च जगाद तां भवत्यहं वणिक्पुत्रो ब्रूहि राज्ञः करोमि किं इत्युक्त्वा तेन सा
प्रायाद्वीरबाहोरथांतिकं तस्मै तथैव साऽशंसद्राजकोपं स्वभर्तरि सश्रुत्वैवायुधो धावद्गृहीत्वा खड्गचर्मणी

मंत्रिभिर्वारितः कोपाद्राजा भौत व्रजेति तं वीरबाहुं स धवलमुखोथ प्राहिणोद्गृहं एवं तदंतरं तन्विमित्रयोरेतयोर्म्म
म इति भार्याय धवलमुखेनोक्तास्तु तोषसा इत्यन्यदुपचारेणामित्रमन्यत्तु सत्यतः तुल्येपि स्निग्धतायोगे तैलं घृ तैलं २
तं घृतं इत्याख्याय कथामेतां मंत्री मुग्धकथाक्रमात् नरवाहनदत्ताय गोमुखो कथयत्पुनः कश्चिन्मुग्धोध्वगा-
स्तीर्त्वा तृषार्त्तस्तु रोटवीं नदीं प्राप्यापि न पयो वीक्षांचक्रे परं जले ऽतृषितोपि पिबस्यंभः किं नेत्युक्तोपि केनचि
त् इयत्कथं पिबामीति मंदबुद्धिरुवाच तां किं दंडयति राजा त्वां सर्वं पीतं न चेत्त्वया इति तेनोपहसितोप्यंबु भीतत-
स्स नापिबत् एवं न शक्नुवंतीह यद्यत्कर्त्तुमशेषतः यथाशक्ति न तस्यांशमपि कुर्वंत्यबुद्धयः जलभौतः श्रुतो देव
श्रूयतां पुत्रघात्ययं बहुपुत्रो दरिद्रश्च मूर्खः कश्चिदभूत्पुमान् स एकस्मिन्मृते पुत्रे द्वितीयमवधीत्स्वयं कथं
बालोयमेकाकी पथि दूरे व्रजेदिति ततः स निंद्यो हास्यश्च देशान्निर्वासितो जनैः एवं पशुश्च मूर्खश्च निर्विवेक म-
तीसमो श्रुतस्त्वया पुत्रघाती भ्रातृभौतमिमं शृणु जनमध्ये कथां कुर्वन्कोप्यासीत् क्वापि मुग्धधीः स भव्यं पुरुषं
दृष्ट्वा दूरान्मूर्खोब्रवीदिदं एष मे भवति भ्राता रिक्थमस्य हराम्यतः अहं तु कश्चिन्नैतस्य तेन नैतदृणं मम इत्युक्त्वा-
न्स मूढोत्र पाषाणानप्यहासयत् एवं मूढस्य मूर्खत्वं स्वार्थांधस्योति चित्रिता भ्रातृभौतः श्रुतो देव ब्रह्मचारिसुतं शृ
णु कश्चित्पितृगुणाख्यानप्रवृत्तः सखिमध्यगः मुग्धः स्वपितुरुत्कर्षं वर्णयन्नेवमभ्यधात् आबाल्याद्ब्रह्मचारी मे पि

तानान्योस्तितन्ममः तच्छुवाचंकुतोजातइतितंसुहृदोब्रुवन् मानसोहंसुतस्तस्येत्येवंपुनरपिब्रुवन् विशेषतो-
वहसितस्सतैर्जडशिरोमणिः अल्पाहृढंवदंत्येवमसंबद्धंजडाशयाः ब्रह्मचारिसुतंश्रुत्वाश्रूयतांगणकोप्ययं:
बभूवनामगणकःकश्चिद्विज्ञानवर्जितः सभार्यापुत्रसहितःस्वदेशेवृत्यभावतः गत्वादेशांतरंचैवमिथ्याविज्ञानमा
त्मनः ततकप्रत्ययेनार्थप्रजांप्राप्तुंदर्शयन् परिष्वज्यसुतंबालंसततंसर्वजनाग्रतः रुरोदपृष्टःसजनैरेवंपापो
गा५ जल्पत्सः भूतंभव्यंभविष्यच्चजानेहंतदयंशिशुः विपत्स्यतेमेदिवसेसप्तमेतेनरोदिमि इत्युक्त्वातेनविस्माप्यलोकं
प्राप्तेह्निसप्तमे प्रत्यूषएवसुप्तंतंसव्यापादितवान्सुतं दृष्ट्वाथतंमृतसुतंसजातप्रत्ययैर्जनैः पूजितोधनमा
साद्यस्वदेशंस्वैरमाययौ इत्यर्थलोभान्मिथ्यैवविज्ञानाख्यापनेभवः मूर्खाःपुत्रमपिघ्नंतिनरज्येत्तेषुबुद्धिमान्:
अयंचश्रूयतांमूर्खःक्रोधनःपुरुषःप्रभो बहिःस्थितस्यकस्यापिपुंसःऊत्रापिश्रृणवतः अभ्यंतरेगुणान्कश्चि-
द्वर्शंसस्वजनाग्रतः तदाचैकोब्रवीत्तत्रसत्यंसगुणवान्सखे किंतुद्वौतस्यदोषौस्तस्साहसीक्रोधनश्चयः इति-
दि३ वाक्यमेवैतंबहिर्वर्त्तीनिशाम्यसः पुमान्प्रविश्यसहसावाससावेष्टयन्गले रेजाल्मसाहसंकिंमेक्रोधःकश्च-
मयास्तितः इत्युवाचचसाक्षेपंपुमान्क्रोधाग्निनाज्वलन् ततोहसंतस्तत्रान्येतमचुःकिंब्रवीत्यसौ प्रत्यक्ष
दर्शितक्रोधसाहसोपिभवानिति एवंस्वदोषःप्रकटोप्यज्ञैर्दैवनबुध्यते इदानींश्रूयतांमुग्धःकन्यावर्द्धयि राम

तान्नृपाणां राजा भरकोपि कन्यैका सुरूपा जनितस्य च सवर्द्धयितुकामस्तामतिस्नेहेन सत्वराः वैद्यानानीय नृपतिः
प्रीतिपूर्वमभाषत सदौषधप्रयोगं तं कंचित्कुरुत येन मे सुतेयं वर्द्धते शीघ्रं स च शत्रेच प्रदीयते तच्छ्रुत्वा ते बुधवै
द्या ऊचुः जीवयितुं जडं अस्त्यौषधमितो दूरात्तत्तु देशादवाप्यते आनयामश्च यावत्तावद्देवसुतातव अदृश्या
स्थापनीयैषा विधानं तत्र ही दृशं इत्युक्त्वा स्थापयामासुर्बन्नांते तां नृपात्मजां संवत्सरान्तरे बहूनौषधिप्राप्तिशं
सिनः यौवनस्थां च तां प्राप्तामौषधेन प्रवर्द्धितां ब्रुवाणा दर्शयामासुः सुतां तस्मै महीभृते सोपि तान्पूरयामास वै
द्यांस्तुष्टो धनोच्चयैः इति व्याजाज्जडधियो धूर्त्तैर्भुज्यन्त ईश्वराः अयं चाकर्ण्यतामर्धपणोपार्ज्जितपंडितः अभून्न
गरवास्येकः पुमान्प्रज्ञाभिमानवान् ग्रामवासी च तस्यैकः पुमान्संवत्सरावधि भृतको वृत्त्यसंतोषादापृच्छ्य स्वगृ
हं ययौ गते तस्मिंश्च पप्रच्छ भार्यां स विगतः समा वत्सः किंचिद्दत्त्वा हीवेति साप्यर्द्धपणमभ्यधात् ततो दृश्य पणान्
तं वा पाथेये स नदीतटे गत्वा स्वभृतकात्तस्मात्तमर्द्धपणमानयत् तच्चार्थकोशलं शंसन्नयो लोकस्य हास्यतां
एवं बहुक्षययति स्वस्य स्वार्थे धनांधधीः अथेदानीमभिज्ञानकर्त्ता च श्रूयतामिति यानपत्रेण मूर्खस्य कस्य
चिद्व्रजतो बुधो राजतं भाजनं हस्तादपतन्न जलान्तरे स तत्र मूर्खोभिज्ञानमावर्त्तादिकमग्रहीत् आगच्छन्नुद्धरि
ष्यामि तदितो हि जलादिति पारं प्राप्यां बुधेस्तीरे दृष्ट्वावर्त्तादि वारिणि मम जभाजनं प्राप्तुमभिज्ञानधियामु

ड्रुः एषश्लोकाशयः सोन्येष्वप्यत्रतधिकृतः एवं च शृणु वेदानीं प्रतिमांसप्रदं नृपं मुग्धः कोपि हृपोप्रश्यत्प्रा
सादाद्द्वावधोनरौ तयोरेकेन चहृतमांसं दृष्ट्वा महानसे पंचमांसपलान्यंगात्तस्य हर्तुरकर्तयता तच्छ्रुत्वेमां
संकर्तितं दृष्ट्वा तं पतितं भुवि जातानुकंपो राजासौ प्रतीहारं समादिशत् छिन्नपंचपलीमांसेनास्य शाम्यति
न व्यथा तद्दत्तोप्यधिकं मांसमस्मै दीयतामिति किं जीवति शिरश्छिन्नेर्दत्तैरुतशिरःशतैः हास्यामिदेवे-
मुक्त्वा सक्षत्ता गवा हसद्बहिः तं समाश्वास्य वैद्येभ्यस्तत्र मांसं समर्प्पयत् एवं मूढप्रभुर्वेत्ति निग्रहं नाप्यनुग्रहं॥
इयं चाकर्ण्यतां मंदा स्त्री पुत्रांतरकांक्षिणी एकपुत्रा स्त्रियं कांचिदन्यपुत्राभिकांक्षया पृछंतीमब्रवीत्काचि
त्पाषंडी क्षुद्रतापसी योयं पुत्रोस्ति ते बालस्तं हत्वा देवताबलिः क्रियते चेत्ततोन्यस्ते निश्चितं जायते सुतः एवं
तयोक्ता यावत्सा तत्तथा कर्तुमिच्छति तावद्वृद्धा हिता स्याः स्त्री हृद्वा तामवदद्रहः हंसि पापे सुतं जातमजातं प्रा
प्तुमिच्छसि यदि सोपि न ते जातस्ततस्त्वं किं करिष्यसि इत्यवार्य्यत सा पापाद्दार्यया हृद्धया तया एवं पतंत्यका
र्येषु शाकिनीसंगता स्त्रियः वृद्धोपदेशेन तु ताः रक्ष्यंते तत्तयंत्रणाः अयं चामलकानेता देवेदानीं निशम्यतां क
स्याप्यभूद्गृहस्थस्य भृत्यः कश्चन मुग्धधीः समादिशद्गृहस्थस्तं भृत्यमामलकप्रियः गत्वारामात्सुमधुराण्यानया
मलकानि मे एकैकं दशनच्छेदेनास्वाद्यानीतवान्जडः आस्वाद्य मधुराण्येतान्यानीतानीक्षतां प्रभुः सोब्रवीत्सो

पितान्यधर्मोविष्टान्याधर्मेकाऊक्तस्तया जहौगृहपतिस्तेनमृत्येनाबुद्धिनासमं निष्प्रज्ञोनाशयत्येवंप्रभोरर्थमथात्मनः ।
अंतराचात्रशृणुतभ्रातृद्वयकथामिमां ब्राह्मणौभ्रातरावास्तांपुरेपाटलिपुत्रके यज्ञसोमइतिज्येष्ठःकीर्त्तिसो-
मोस्यचानुजः पित्र्यंचाभूद्धनंभूरितयोर्ब्राह्मणपुत्रयोः कीर्त्तिसोमोनिजंभागव्यापाराद्यैरवर्द्धयत् यज्ञसोमस्तु
भुंजानोददंश्चाप्यनयत्क्षयं ततःसनिर्द्धनीभूतोनिजांभार्यामभाषत प्रियेधनाढ्योभूत्वाहमिदानींनिर्द्धनःक-
थं वसामिमध्येबंधूनांतद्विदेशंश्रयावहे पाथेयेनविनाकुत्रयावइत्युदितेतया निर्बंधंतंयदाचक्रेतदा-
भार्यातमाहसा अवश्यंयदिगंतव्यंतद्गत्वाकीर्त्तिसोमतः मृगयस्वधनंकिंचित्पाथेयमनुजादिति ततोगत्वा-
नुजंयावत्पाथेयंतंसमार्गति तावत्तदनुजःसोत्रजगदेभार्ययास्वया क्षपितस्वधनायास्मैवयंदमःकुतः
क्रियत् यएवहिदरिद्रःस्यात्सएवास्मात्प्रजिष्यति श्रुत्वेतकीर्त्तिसोमोसौभ्रातृस्नेहादतोपिसन् नैतदातुंकिमप्य-
स्मैकष्टाकुस्त्रीषुवश्यता यज्ञसोमस्ततस्तूष्णींगत्वापत्न्यैनिवेद्यतत् तयासहप्रस्थितवान्दैवैकशरणस्ततः गत्व-
न्प्राप्तोटवींदैवान्निगीर्णोजगरेणासः तद्भार्य्याचतदालोक्यचक्रंदपतिताभुवि किमाक्रंदसिभद्रेत्वमितिमानु-
षभाषया सातेनाजगरेणोक्ताब्राह्मणीनिजगादतं नक्रंदामिकथंयस्मान्महासत्वत्वयामम दुःखितायाविदेशे
घहाभिक्षाभाजनंहृतं तच्छ्रुत्वाजगरोवक्त्राद्दुःखीर्यास्यैददौमहत् स्वर्णपात्रंगृहाणेदंभिक्षाभांडमितिब्रुवन्ः

कोमहाभागभिक्षांमेदास्यत्यस्मिन्स्त्रियाइति उक्तश्चयावद्ब्राह्मण्याजगादाजगरस्ततः नदास्यत्यर्थिनोप्यत्रभिक्षां
तेतस्यतद्वचनं शतधायास्यतिशिरःसत्यमेतद्वचोमम तच्छ्रुत्वाब्राह्मणीसातमुवाचाजगरंसती यद्येवंतत्त्वमेवा
त्रभर्तृभिक्षांप्रयच्छमे इत्युक्तमात्रेब्राह्मण्यासत्याशोजगरोमुखात् उज्जगारक्षतंयज्ञसोमंजीवंतमेवतं तमुन्म
क्तयैवसपदिदिव्योसोजगरःपुमान् परितुष्टश्चतौदृष्ट्वोदंपतीनिजगादसः अहंकांचनवेगाख्योविद्याधरमहीपतिः
सोहंगौतमशापेनप्रापमाजगरांतनुं साध्वासंवादपर्यंतस्तस्तचशापोममाभवत् इत्युक्त्वाहेमपात्रंचरत्नैरापूर्य
तत्क्षणं विद्याधरेश्वरोहृष्टः खमुत्पत्यजगामसः तौचाययतुरादायरत्नौघंदंपतीगृहं तत्रास्तयज्ञसोमोसावक्ष
य्याप्तधनःसुखं सत्वानुरूपंसर्वस्यधातासर्वंप्रयच्छति श्रूयतांनापितस्यार्थमुग्धोत्रचपुमानयं कर्णाटःकोपिभू
पंस्वरणेशौर्यादतोषयत् सप्रसन्नोन्यपस्तस्मायभीष्टंदत्तवान्वरं तस्यैवनापितंवव्रेनपुंसकनिभोभटः सर्वश्चि
त्तप्रमाणेनसदृसंक्षाभिवांछति नकिंचिन्मार्गणांचेममुन्मुग्धंशृणुताधुना कश्चित्पथिव्रजन्मूर्खःशकटस्थेन
केनचित् ऊचेसमंकुरुष्वेतच्छकटंमेमनागिति समंकरोमिचेत्तन्मेकिंददासीतिवादिनं नकिंचित्तेददामीति
शकटीनिजगादतं ततःसमूर्खःशकटंसमंतत्रैवतस्यतत् तन्मेनकिंचिद्देहीनितंयाचेसवास्तत इतिदेव
सदैवहास्यभावंचजनस्यनिंघतांच विपदास्पदतांचयांतिमूढामतिमंतस्तुभवंतिपूजनीया एवंसगोमु

स्वमुखोक्तकथाविनोदमेतन्निशम्यससचिवैरजनैःसमेतः विश्रांतिहेतुमखिलस्यजगत्त्रयस्यनिद्रामसेवतनरवाहनदत्त- न१
देवः इतिश्रीभट्टसोमदेवविरचितेकथासरित्सागरेशक्तियशोलंबकेपंचमस्तरंगः ५ आदितएकषष्टितमस्तरंगः
६१ ॥ ततःप्रातःसमुत्थायपितुर्वत्सेश्वरस्यसः नरवाहनदत्तोत्रवत्सलस्यांतिकंययौ तत्रपद्मावतादेवीभ्रात
रिस्वगृहान्ततः आगतेमगधेशस्यतनयेसिंहवर्मणि तत्स्वागतकथाप्रस्तप्रवादैर्वासरेगते नरवाहनदत्तःस्वभु
क्तामंदिरमाययौ तत्रशक्तियशःसोत्कंतंविनोदयितुंनिशि ततःसगोमुखोधामानिमामकथयत्कथं बभूवक्वापि
सच्छायोमहान्यग्रोधपादपः शकुंतशब्दैःपथिकान्विश्रामायाह्वयन्निव तत्रासीन्मेघवर्णाख्यःकाकराजःकृताल
यः तस्याप्यवमर्दनामाभूदुलूकाधिपतीरिपुः एतस्यकाकराजस्यतत्ररात्रावुलूकराट् एत्यकाकान्बहून्हत्वातत्वाप
रिभवंययौ प्रातःसकाकराजोत्रसंघायेवाचमंत्रिणः उड्डीव्याडीविसंडीविप्रडीविचिरजीविनः सशत्रुःपरिभूया
स्माल्लब्धलक्ष्योबलीपुनः आपतेदिहतत्तत्रप्रतीकारोनिरूप्यतां तच्छ्रुत्वाभाषतोड्डीवीशत्रौबलवतिप्रभो अ
न्यदेशाश्रयःकार्यस्तस्मैवानुनयोथवा श्रुत्वैतदाडीव्याहस्मसद्योनभयमप्यदः परांशयंस्वशक्तिंचवीक्ष्यकुर्मोय-
थाक्षमं ततोजगादसंडीवीमरणंदेवशोभनं ननुप्रणामनंशत्रोर्विदेशेवापिजीवनं योद्धव्यंतेनसाकंनतेताव
द्धेनशत्रुणा राजासहायवान्शूरस्सोत्साहोजयतिद्विषः अथप्रजीव्यूक्तिस्मनजय्यःसबलोरणे संधिस्तेनवात्रहंतव्यः

संप्राप्तेवसरे पुनः चिरंजीवीततोवादी कः संधिर्हृतएवकः आसृष्टिवैरं काकानामुलूकैस्तत्र कोव्रजेत् मंत्रसा
ध्यमिदं मंत्रो मूलं राज्यस्य चोच्यते श्रुत्वैतकाकराजस्तं सोब्रवीच्चिरजीविनं वृद्धस्त्वं वेत्सि चेत्तन्मे ब्रूहि वं केनहेतुनाः
काकोलूकस्य वैरं त्विमं त्रंवक्ष्यत्यतः परं श्रुत्वातकाकराजं तं चिरजीवाजगादसः वाग्दोषोयं श्रुताकिंन गर्दभा
ख्यायिकाकया केनापिराजकेनेत्यगर्द्दभः पुष्यते त्वशः परसस्येषु मुक्तोभूद्वाबाघद्वीपिचर्मणा सतानिखादन्दी
पीतिजनैस्त्रासात्नवारित्यः एकेनददृशेजातु कार्षकेनधनुभृता सतंद्वीपीतिमन्वानः कुब्जीभूयभयाननः कंब
लावेष्टिततनुर्गंतुंप्रववृतेततः तंचदृष्ट्वातथायांतं खरोयमितिचिंतयन् खास्तंस्वरुतेनोच्चैः व्याहरंसस्यपो
षितः तद्बुवागर्द्दभंमत्वातमुपेत्यसकार्षिकः अवधीद्गगयतेनत्ततवैरंस्वयागिरा एवंवाग्दोषतोस्माकमुलू
कैः सहवैरिता सर्वेघराजकाआसन्कदाचिदपिपक्षिणः तेसंभूयारभंतेस्मपक्षिराजाभिषेचनं सर्वैकर्तु
मूलूकस्यढौकितछत्रचामरं तावच्चगगनायातस्तद्दृष्ट्वावायसोब्रवीत् रेमूढाः संतिनोहंसकोकिलाद्यान्
किंखगाः येनक्रूरदृशंपायमिममप्रियदर्शनं अभ्यषिंचयराज्येस्मिंधिगुलूकममंगलं राजाप्रभावत्वा
न्कार्येयस्यनामैवसिद्धितत् तथाचशृणुतात्रैतांकथांवोवर्णयाम्यहं अस्तिचंद्रसरोनाममहद्गजिलंस
रः शिलामुखाख्यस्तत्तीरेन्यवसन्शशकेश्वराः तत्रावग्रहशुष्कान्यनिपातोगजयूथपः चतुर्द्दंताभिधानो

भः पातुमागात्कदाचन तस्य यूथेन शशकागाहमानेन तत्र ते शिलीमुखस्य बहवः शशराजस्य चूर्णिताः ततो ग
जपतौ तस्मिन्गते सोत्र शिलीमुखः दुःखितो विजयं नाम शशं प्राहान्यसंनिधौ छ्यास्वादो गजेन्द्रोयं पुनः पुनरिहै
तद्द्वासा प्रवेशयति तत्र मां तद्ब्रूहि किं न कामोहं प्राप्तिः कस्यान्ययोषितां यश्चित्राकरधर्षिताया भार्यायाः श
शिनः प्रियः एतत्कुत्सितवचः श्रुत्वा शशी निर्घाततदारुणं दुःखं निगृह्य जिज्ञासुर्निश्चयं तमुवाच सः सत्यं भ
वसि कामस्त्वं तदेवं वाहमर्थये वृत्तः श्रुतायामुत्पन्नं तस्यां कौतूहलं मम तदद्यैव निशान्तत्र त्वद्देशेन व्रजा
म्यहं प्रसादान्वहलभ्यैर्थैतवात्र कियतीक्षतिः इत्युक्तः शशिना तेन स ऊर्ध्वोक्तमभाषत एवमस्तु गृहा
णेदं मद्वेशं देहि मे निजं तिष्ठाहमिव संवेष्ट्य यानि पादं चवासस्ता यावदायाति सा तस्या दासी तमसि जृंभि राम
५२

ते मद्बुध्यस्व चतया पृष्टे गृहीतो ह मिव व्रज अहं हि पादे वैकल्याङ्गाम्यय यथा तथा इत्युक्तः ऊषिनास्सोथश
शीतद्देशमास्थितः तत्रासातत्सहायो द्वौ ऊष्टीचासाद्धिह्नातेः अथागत्य तथाऊषिवेषोद्दष्टः सतद्धियाः
एहात्युत्का शशी भार्यां हास्याप्पृष्टे धूर्तोप्पत निन्येचन तं सद्वितया स्वभार्यायास्ततोतिकं ऊष्टी जारप्रतीक्षि
णयास्तस्यास्त्वभू गृहान्तरं तत्रांधकारे शोचंतामंगस्पर्शेनानांध्रुवं स्वभार्यामेवनिश्चित्य सवैराग्यमगाछशीः
ततस्तस्याप्रसुप्तायानिर्गत्यादृष्टएवसः जगामधनदेवस्य रुद्रसोमस्य चांतिकं आख्यायचस्ववृत्तांतं त
योः स्वित्रोजगाद सः हाधिग्निम्नाभियातिन्योलोलाक्षिलहरीभ्रमाः सक्षोभाः ऊस्त्रियः शक्याः पातुं स्वमात्रा
पगाइव यद्देषामभूद्गृहस्थापि भार्यामे ऊषिनंगता तन्ममापि वनंश्रेयो धिग्गृहानिति सब्रुवन् समदुःखव
ताग्विप्रयुतस्तामनयन्निशां प्रातस्त्रयोपि सहिताः प्रस्थितास्ते वनं प्रति सवापाकतलं प्रापुर्दिनांते पथिपाद
पं भक्तपीताश्चदद्दशुर्वापीमध्यात्समागतं पुरुषं वदनोद्गीर्णासतल्लीकशयनायकं उपभुज्य स्त्रियं तां च सुष्वाप
शयनीयके स्त्राचद्दृष्टैव संजग्मे पांथेनोत्थाय तेनसा कोयुवामितिपृष्टाचरतांते तेनसाब्रवीत् नागएषो
हमेतस्य भार्येयं नागकन्यका मांभूद्भयं चते यस्मात्पांथानां नवतिर्मया नवाधिकोपभुक्तैवह रितं त्वशतं
त्वया एवं वदंतीं तां तस्य पापार्थं दैवात्प्रबुध्यसः नागो दृष्ट्वा मुखज्वालाभिर्मुक्ताभस्मीचकार तो नशक्या रक्षितुं

वृ॰लं॰१॰
५३
53

यत्रदेहांतर्निहिताअपि स्त्रियस्तत्रगृहेतासांकावार्त्ताधिग्धिगेवताः इतिनागेगतेवापीं ब्रुवंतस्तेत्रयोनिशां।
शशिप्रभृतयोनीत्वानिर्वृताःप्रययुर्वनं तस्मिन्मैत्र्याद्यविकलचतुर्भावनाभ्यासशांतैः सम्यग्नियतमतयः
सर्वभूतेषुसौम्याः प्राप्ताःसिद्धिंनिरुपमपरानंदभूमौसमाधौ जग्मुर्मोक्षंक्षपिततमसस्तेत्रयोपिक्रमेण।
तायोषितस्तुतेषांनिजपापविपाकजनितकष्टदशा अचिरादेवविनष्टा दुष्टालोकद्वयभ्रष्टाः एवंमोह
प्रभवोरागोनस्त्रीषुकस्यदुःखाय तास्वेवविवेकवतोभवतिविरागस्तुमोक्षाय इतिगोमुखतःकथाविनोदं
सचिवाच्छक्तियशस्समागमोत्कः पुनरेवसवत्सराजपुत्रश्चिरमाकर्ण्यसनिर्जगामनिद्रां॥ इतिश्रीभट्टसो
मदेवविरचितेकथासरित्सागरेशक्तियशोलंबकेऽष्टमस्तरंगः॥ ८॥ आदितश्चतुःषष्टितमस्तरंगः
६४॥ अथान्येद्युःपुनरिमांनिशिप्राग्वद्विनोदयन् नरवाहनदत्तायगोमुखोकथयत्कथां बभूवनगरे
क्वापिबोधिसत्वांशसंभवः कस्याप्याढ्यस्यवणिजस्तनयोमृतमातृकः अन्यजायाप्रसक्तेनपित्रातत्प्रेरि
तेनसः निरस्तोवनवासायसभार्योनिरगाद्गृहात् सोनुजंतुसहायातंतद्दुश्चरित्रान्निराकृतं अशांतचित्तमु
त्सृज्यसोन्येनैवपथाययौ प्रक्रमंश्चक्रमात्प्रापनिस्तोयतृणपादपां पाथेयहीनःचंडांशुतप्तांमरुमहाटवीं॥
तस्यांव्रजसप्ताहंभार्यांक्षांतांक्षुधार्दितां अजावयंस्वमांसासृग्भ्यांपायातान्याहारद्वसा अष्टमेह्निसरि

राम
५३

द्वावीवाचाल्लंगिरिकाननं प्रापसत्फलसमायपादपं स्निग्धशाद्वलं: तत्रसंभाव्यभार्यांतां क्लांतोमूलफलांबुभिः।
अवातरद्गिरिनदीस्नातुंकल्लोलमालिनीं तस्यांददर्शचछिन्नपादहस्तचतुष्टयं ह्रियमाणंजलौघेनक्रंदंतं
त्राणकांक्षिणं बहूपवासक्लांतोपितांविगाह्यनदींतत उज्जहारकृपालुस्तंमहासत्वःसशूद्रकं केनेदंतेकृतंभ्रा
तारितिकारुणिकेनसः तेनारोप्यस्थलंपृष्टस्तरुग्नःपुरुषोभ्यधात् निकृत्तहस्तचरणेनद्यांक्षिप्तोस्मिशत्रु
भिः द्विसुभिःक्लेशमरणंत्वयाहंनूद्धृतस्तत एवमुक्तवतस्तस्यसवधव्रणपट्टिकां दत्वाहारंमहासत्वःस्नाना
दिव्यधितात्मनः ततोमूलफलाहारोभार्यायुक्तोत्रकानने सतस्थौबोधिसत्वांशोवणिक्पुत्रस्तपश्चरन् एक
दाफलमूलार्थंगतेतस्मिंस्मरातुरा तद्भार्यातेनरुग्णेनरेमेलग्नव्रणेनसा तत्सक्तातेनसमंत्र्यभर्तुरस्यवधैषि
णी युक्त्याचकारसान्येद्युर्मांद्यंदुश्चारिणीमृषा श्वभ्रेदुरवतारेत्रस्थितांदुस्तरनिम्नगे दर्शयित्वौषधिंपापा
सापतिंतमभाषत जीवाम्यहंत्वयैषाचेत्समानीतामहौषधिः जानेह्येतामिहस्वंमोस्वप्नेवक्तिस्मदेवता तद्बुवा
सतथेत्येवंश्वभ्रेतत्रौषधेःकृते रज्जुवेष्टितयावाद्धावातरत्तरुबद्धया अवतार्णस्यार्जुतांचिक्षेपोन्मुच्यतस्यसा।
ततःसपतितोनद्यांतयाजद्धेजहौघया दूरंद्वायोनीवाचतयासुकृतरक्षितः नद्याकस्यापिनगरस्याप्तितः
सतटांतिको ततःसतारमारुह्यचिंतयन्त्राविचेष्टितं जलावगाहनक्लांतोविशश्रामतरोस्तले तस्मिन्कालेत्रन

वृ०क०१०
५४

5ख

गे राजा तत्र मृतोभवत् मृते राजनि दैवानादिदेशे तत्रेदृशी स्थितिः यन्मंगलगजः पौरैर्भ्राम्यमाणः करेणयं आ
रोपयति पृष्ठे स्वे सोत्र राज्येभिषिच्यते सुधैर्यः उष्ट्रोधावतेव भ्रमन्प्राप्नोति कं गजः उत्क्षिप्यारोपयामासस्वपृष्ठं तं
वणिक्सुतं ततः स नगरं नीत्वा राज्ये प्रकृतिभिः क्षणात् वणिक्सुतोभिषिक्तोभूद्बोधिसत्त्वांशसंभवः सराज्यं प्राप्य
करुणामुदिताक्षान्तिभिः सह ः अरंस्त नउपायाभिः स्वाभिश्चपलवृत्तिभिः तद्भार्या सापि निःशंका भर्त्रा नावं न
दीगतं बभ्राम बिभ्रती जारं रुग्णं पृष्ठे धिरोपितं वैरिच्छिन्नांघ्रिहस्तोयं भर्त्ता मे हं पतिव्रता भिक्षित्वा जीवयाम्य
तं तद्भिक्षां मे प्रयच्छत इति सा भिक्षमाणा च ग्रामे ग्रामे पुरे पुरे राज्यस्थस्यात्मनो भर्त्तुर्नगरं प्राप्य चक्रमात् तथै
व भिक्षमाणा च राजस्तस्य क्रमेण सा पतिव्रतेत्यर्च्यमाना पौरैः श्रुतिपथं ययौ आनाययन्स राजा च तां प्रणामं
ढरुग्णकां त्वं सापि पतिव्रतेत्यासात्पविज्ञाय च पृष्टवान् साहं पतिव्रता देवेत्यपरिज्ञाय सापितं भर्त्तारमब्रवी
त्या पारा जश्चातेजसावृतं ततः स बोधिसत्त्वांशो हसन्राजा जगाद तां दृष्टं पतिव्रतात्वं ते फलेनेदं मयैव च स्व
रक्तमांसं दत्वा पित्वा कर्तुं शक्तितानया स्वेना विलुप्तहस्तेन भर्त्ता मानुषराक्षसा सा मदारक्तमांसानि हरन्ती बत मेक
क२ थं रुग्णेन विल्लेनापि स्वात्तत्यवहनी तता किं स्विद्रुढः स भर्त्ता यं नद्यां क्षिप्तस्त्वया नघः कर्मणा तेन वहसे रुग्णा मेनं राम
बिभर्षि च इत्युद्घाटितवान्तेन च परिज्ञाय पतिं ततः भया सा मूर्छितेवाभूल्लिखितेव मृतेव च किमेतद्ब्रूहि देवेति ५८

सोथराजासकौतुकैः पृष्टोमात्यैर्यथावृत्तंतैःससर्वमवर्णयत् ततोभर्त्रेद्रुहंमत्वातांछित्वाकर्णनासिकां तत्तांकां
मंत्रिणोदेशान्सहग्रामान्निवासयत् छिन्ननासान्ततावोधिसत्वेनसन्त्यजश्रिया युक्तंसदृशसंयोगंतदाविधिरदर्शय
त् एवंदुरवधार्यैवगतिश्चित्रस्ययोषितां दैवस्येवाविचारस्थनीचैकाभिमुखस्यच एवंवात्सल्यकुशलानांसत्वानां
विजितक्रुधां उच्चैर्वाचिंतिताएवसत्वयमायांतिसंपदः इत्याख्यायकथामेतांगोमुखःपुनरेवसः नरवाहनदत्ता
यकथामेतामवर्णयत् कोप्यासीद्बोधिसत्वांशोवनेक्वापितपोटजः करुणाकांदिहृदयोमहासत्वस्तपश्चरन् सतत्र
जंतूनापन्नान्पिशाचांश्चसमुद्धरन् अपरांश्चजलैरन्नैःस्वप्रभावादतर्पयन् एकदाप्युपकारार्थंभ्रमंस्तत्राटवीभुवि
महांतंकूपमद्राक्षीत्तदंतश्चदृशंददौ तावज्ज्ञस्त्रीतरंतस्थातंदृष्ट्वोच्चैरभाषत भोमहात्मन्नहंनारीसिंहःस्वर्णशि
ज८ खःखगः भुजगश्चेतिचत्वारः कूपेत्रनिशोवयं पतितास्ततःक्लेशाद्दुद्धरास्मांतपांकुरु एतच्छ्रुत्वाजगादैतांस्त्रियंय्
यंत्रयोयदि तमसांधानिपतिताःखगोत्रपतितःकथं तथैवैवोपिपतितोव्याधजालेनसंयतः इतिसापिमहास
त्वंतंनारीप्रत्यभाषतः ततःसासतपःशक्त्यायावदुद्धर्तुमिच्छति तावच्छाकनोद्धर्तुंसिद्धिस्तस्यप्रहीयत पापे
यंस्त्रीध्रुवंसिद्धिरेतत्संभाषणाद्धिमे नष्टायतस्त्वत्रताद्युक्तिमन्यांकरोम्यहं इतिसंचिंत्यप्रज्ञातांस्तृणावेष्टितया
खिलान् उज्जहारमहासत्वसकूपात्कुर्वतस्तुतिं सविस्मयश्चपप्रच्छसिंहपक्षिभुजंगमान् व्यक्तवाचःकथंवो

वृ०क०१०
५५
55

दृष्टान्तं तच्छ्रोष्यतामिति ततः सिंहोब्रवीद्व्यक्तवाचो जातिस्मरा वयं अन्योन्यबाधकाश्चास्मद्वृत्तान्तं च क्रमाच्छृणु।
अस्ति वैडूर्य्यशृंगाख्यं तुषाराद्रौ पुरोत्तमं पद्मवेगाभिधानोस्ति तत्र विद्याधरेश्वरः वज्रवेगाभिधानश्च पुत्रस्तस्यो
दपद्यत स वज्रवेगो हंकारी विरोधं येन केनचित् साकं शौर्य्यमदाच्चक्रे लोके वैद्याधरे वसन् निषेधतः पितुस्तस्य
सदा नागणयद्वचः तथापि तातमशपन्मर्त्यलोके पतेति सः ततो नष्टमदो भ्रष्टविद्यः शापहतो रुदन् वज्रवेगः स
पितरं तं शापान्तमयाचत ततः स पद्मवेगस्तत्पिता ध्यात्वाब्रवीत्क्षणात् भुवि विप्रसुतो भूत्वा त्वं वाप्येवंमदं पुनः पि
तुः शापात्ततः सिंहो भूत्वा कूपे पतिष्यसि महासत्त्वश्च तत्पयाकश्चित्त्वामुद्धरिष्यति तस्य प्रत्युपकारं च विधाय यदि मो
क्ष्यसे शापादस्मादिति पिता शापान्तं तस्य तं व्यधात् अथेह वज्रवेगोसौ विप्रस्याजनि मालवे हरघोषाभिधान
स्य देवघोषाभिधः सुतः स तत्राप्यकरोद्वैरं बहुभिः शौर्य्यदर्प्पतः बहुभिर्मा त्वथा वैरमिति तं चावदत्पिता अकुर्वाणं
वचस्तस्य शप्त्वा स पिता क्रुधा शौर्य्याभिमानाद्दुर्बुद्धिः सिंहस्त्वं भव सांप्रतं एवं तस्य पितुः शापाद्देवघोषः पुनश्च्य
सः विद्याधरावतारस्स सिंहो जातोत्र कानने तमिमं विद्धि मां सिंहं सोहं दैवात्भ्रमन्निशि कूपेत्र पतितो मुक्तिन्म
हासत्त्वोकृतस्त्वया तथा मितावदापच्च यदास्या कापि तेतदा मां स्मोरस्युपकारं ते त्वा मोक्ष्ये स्वशापतः इत्युदार्य्य
गते सिंहे बोधिसत्त्वेन तेन सः एष सुवर्णचूलोथ पक्षी स्वोदन्तमभ्यधात् अस्ति विद्याधराधीशो वज्रदंष्ट्रो हिमाचले। राम ५५

तस्यदेव्यामजायंतपंचकन्यानिरंतराः ततःसहरमाराध्यतपसाप्राप्तवान्सुतं राजारजतदंष्ट्राख्यंजीवितादधि
कप्रियं मृतेनपित्राबालोपिविधात्स्नेहेनलंबितः वृद्धिंरजतदंष्ट्राख्योबंधुनेत्रोत्सवोययौ एकदाभगिनीज्ये
ष्ठांनाम्नासोमप्रभांचसः गौर्याःपुरःपिंजरिकांवादयंतीमवैक्षत देहिपिंजरिकांमह्यंवादयाम्यहमप्यदः इत्य
याचततांसोथबालत्वादनुबंधतः सातांनाददाद्यदातस्मैतदाचापलतःस्वयं तस्यास्तदपहृत्यैवपक्षावोदपत
न्नभः साथस्वसातमशपद्यन्मे पिंजलिकांहगत् इवोड्डीनोसितत्पक्षीस्वर्णचूडोभविष्यसि तच्छ्रुत्वापादपति
तेनैत्यसातेनयाचिता स्वसारजतदंष्ट्रेसातस्यशापांतमब्रवीत् पक्षाभवांधकूपेवंयदामढपतिष्यसि उद्धरि॰
ष्यसिकश्चिज्जतदात्वांकरुणापरः तस्यत्वंचोपकारांशंशापमेतंतरिष्यसि इत्युक्तःसतयाभ्रातास्वर्णचूलःखगो॰
जनि सएषस्वर्णचूलोहंपक्षीभ्रष्टोवटेनिशि इहोध्वतोस्मिभवतातदिदानींव्रजाम्यहं आपदिवंस्मरेन्मांचत
वत्त्वंवाद्युपक्रियां शापान्मोक्ष्येहमित्युक्त्वासोपिपक्षीययौततः ततःसबोधिसत्वेनततःपृष्टोभुजंगमः स्वादंतं
वर्णयामासतस्माऐवंमहात्मने पुरामुनिकुमारोहममभूवंकश्यपाश्रमे अभवत्तत्रचैकोमेवयस्योमुनिपुत्रकः।
एकदाचावतीर्णोस्मिसरःस्नातुंवयस्यके तटस्थितेहमद्राक्षंत्रिफणांसर्प्पमागतं तेनाभावयितुंनंचवयस्यंनम॰
र्मणामया तंसंमुखंतटांतेथबद्धोमंत्रबलाद्दहिः क्षणान्स्नात्वातटप्राप्तोमांवयस्योवलोकयमः अशंकितंमहाहिं

बृं०कं०१०
५६
56

तंत्रस्तोमोहमुपागमत् चिरादाश्वासितःसोथमयाध्यानादवेत्यतत् मन्त्रं तंत्रासनं कोपाद्धपतिस्मसत्वापिमां ग
च्छेदृगेवत्रिफणःसर्पोभवमहानिति अनुनातश्चशापांतमृषिपुत्रस्तमभ्यधात् सर्पीभूतं च्युतं कूपेयोसौवामु
द्धरिष्यति तस्योपकृत्यावसरेशापमुक्तोभविष्यति इत्युक्तेवगतेतस्मिन्नेषोहंसर्पतांगतः उद्धृतोस्मित्वयाकू
पाद्द्यतथापिसंप्रति स्मृतःश्चेत्योपकारंतेत्वामोक्ष्येस्वशापतः इत्युक्त्वाभुंगेयातेस्त्रीस्ववृत्तमवर्णयत् अ ज४
हंक्षत्रियपुत्रस्यभार्याराज्ञोपजीविनः श्रास्यत्यागिनोयूनःश्चारुरूपस्यमानिनः ततोन्यपुरुषासंगोमयात
दपिपापया तद्विज्ञायसभर्त्तामेनिग्रहायाकरोन्मतिं सखीमुखाच्चतद्बुध्वादुःखेनाहंपलायिता रात्रौवनां
प्रविष्टेदंकूपमन्धेष्टोध्धतात्वया वत्सतस्मादिदानींचगत्वाजीवामिकुत्रचित् भूयात्तन्मेदिनंयत्रकुर्यांतेत्व
त्युपक्रियां इत्युक्त्वाबोधिसत्वंतंकुलटानिकटात्ततः गोत्रवर्द्धनसंज्ञस्यराज्ञःसानगरंययौ तस्यसंगतिमुत्पा
द्यपरिवाराजनैःसह तस्मिन्राजमहादेव्यादासीभावाश्रयेणच तस्यापिबोधिसत्वस्यतस्याःसंभाषणात्स्त्रियः ना
विताःसाश्चनेनस्वसिद्धैर्मूलफलादिकं ततःक्षुत्क्षाम्यात्क्लान्तःप्राकृतसिंहंतमस्मरन् स्मृतागतःसतस्यैत्यव्याधहृत्तिं
मृगामिषैः कंचित्कालंसतन्मांसैःप्रवृत्तिस्थविधायतं केसरीसोब्रवीत्क्षीणःसशापोमेव्रजाम्यहं इत्युक्त्वासिंहतां राम
मुक्त्वाभुत्वाविद्याधरःक्षणात् जगामतदनुज्ञाततमामंत्र्यनिजंपदं ततःसबोधिसत्वांशोहृत्तिग्लानःपुनःखगः॥ ५६

सस्मार स्वर्णचूलं तमुपागात्सोपि तत्स्मृतः आवेदितार्थस्तेनासौ गत्वानीय खगक्षणात् रत्नाभरणसंसर्गं ददौ
तस्मै करंडिकां उवाच चैतेनार्थेन वृत्तिः स्यात्स्वं गम्यतां तव मम जातः सशापांतः स्वस्ति ते साधु याम्यहं इत्युक्त्वासौ
पि भूत्वैवं विद्याधरकुमारकः स्वं लोकं नभसा गत्वा प्राप्य राज्यं निजं पितुः सोपि रत्नानि विक्रेतुं बोधिसत्वः परिभ्रम
न् तत्राप नगरं यत्र सा स्त्री कूपोद्धृता स्थिता तत्रैकस्याश्च वृद्धाया ब्राह्मण्या विजने गृहे निधाय तान्याभरणा-
न्यापणं यावदेति सः तावद्ददर्श तामेव वने कूपात्समुद्धृतां स्त्रियं संमुखमायांतीं सापि स्त्री पश्यति स्म तं संभाषणा
दिके न्योन्यं तत्ते सा स्त्री कथाक्रमं स्वं राजमहिषीपार्श्वस्थितमस्मै न्यवेदयत् सोपि पृष्टः स्ववृत्तांतं तस्यास्तस्यै शशं-
सतां रत्नालंकरणप्राप्तिं स्वर्णचूलखगाद्रुजुः नात्वा चाभरणं तस्यै वृद्धावेश्मन्यदर्शयत् सापि गत्वा शठा राज्ञै-
स्वस्वामिन्यै शशंस तत् तस्याश्च राज्ञा गेहात् तत्स्वर्णचूलेन पक्षिणा तं बलेन पश्यंत्या एव आभरणभांडकं ततः नी१८
सा स्वपुरं प्राप्तं राज्ञा तस्या मुखात् स्त्रियाः बुध्वा विदितवेद्याया राजा नेतं व्यजिज्ञपत् राजापि बोधिसत्वं तं दर्शि
तं स्त्रिया तया आनाय्य साभरणं स्तैर्बंध्वा गृहात्ततः परिपृष्टश्च वृत्तांतं सत्यं मत्वा च तद्वचः स्थापयित्वा
च तं बद्धं जग्राहाभरणान्यपि स बद्धस्थोपि सस्मार बोधिसत्वो भुजंगमं ऋषिपुत्रावतारं तमुपतस्थे च सोपि तं
दृष्ट्वा च तं सपृष्टार्थः सर्पः साधुमुवाच तं गत्वा तं वेष्टयाम्येनमामूर्द्धांतं महीपतिं न च मुंचाम्यहं यावदागत्यो-

दृ०कं०१०
५७
57

कोस्मिन त्वया मोक्ष्याम्यहं नृपं सर्प्पादितिवं च वदेरिति त्वय्यागते त्वद्वचसा मोक्ष्याम्यहं मतो नृपं मन्मुक्तश्चैष
राजा ते स्वराज्यार्द्धं प्रदास्यति · इत्युक्त्वा स च गत्वैव परिवेष्टितवानहिः राजानमास्त चैतस्य मूर्द्धि न्यस्य फणात्रयं ॥
हाहा दृष्टो हिना राजेत्याक्रंदति जने थ सः बोधिसत्त्वोब्रवीद्रक्षाम्यहं नृपमहेरिति श्रुतवद्भिश्च तैर्वाक्यं विज्ञप्तः-
सोनुजीविभिः आनाय बोधिसत्त्वं तं सर्प्पाक्रांतोब्रवीन्नृपः यदि मां मोचयस्यस्मात्सर्प्पात्तत्ते वदाम्यहं राज्यार्द्धमंत
रस्थाश्च तवैते मंत्रिणोत्र मे तच्छ्रुत्वा बाढमित्युक्ते मंत्रिभिः स जगाद तं भुजगं बोधिसत्त्वांशो मुंच राजानमाश्विति
ततस्तेनाहिना मुक्तो राज्यार्द्धं नृपतिर्ददौ स तस्मै बोधिसत्त्वाय सोपि स्वस्थो भवत्क्षणात् सर्प्पश्च क्षीणपापायः सञ्जज्ञे
मुनिकुमारकः सदस्याख्यातदृष्टान्तो जगाम निजमाश्रमं एवं निश्चितमन्येति शुभमेव शुभात्मनां एवं चातिक्रमो
नाम क्लेशाय महतामपि अविश्वासास्पदं चैव स्त्रीणां स्पृशति नाशयं प्राणदानोपकारोपि किं तासामन्यदुच्यते इत्या
ख्याय कथां वत्सराजपुत्रं स गोमुखः उवाच कथयाम्येताः पुनर्मुग्धकथां शृणु बभूव श्रमणः कश्चिद्विहारे कापि मू-
ढधीः स रथ्यायां भ्रमं जातु श्वशुना जानुन्यदृश्यत श्वदष्टः स स्वं विहारमुपागत्य व्यचिंतयत् किं वृत्तं जानुनि तवेत्येकै
कः प्रक्ष्यतीह मां प्रत्याययिष्याम्येवं च कियतो वा कियच्चिरं तदुपायं करोम्यत्र सर्व्वान्बोधयितुं स तत् इत्यालोच्य-
स माहृत्य स विहारोपरि द्रुतं गृहीत्वा ग्रंथिमुशल्लं मूढो भिक्षुरवादयत् अकारणमकालेपि ग्रंथिं वादयसातितं श्रुत्वा

राम
५७

श्चर्येणमिलिताःपप्रच्छुरथभिक्षवः शुनामेभक्षितोजानुस्तरैकैकस्यपृच्छतः उपायःततमित्येवंयुष्यंसंघट्टिता-
मया तद्बुध्यध्वंसमंसर्वैजानुंमेपश्यतेतिसः भिक्षुःप्रत्यब्रवीदेतांश्चदृष्टंजानुदर्शनं ततःपार्श्वोपपीडंतेसमग्रा
भिक्षवोहसन् कियन्मात्रेत्ततोनेनसंरंभोयंकियानिति आख्यानःश्रमणोमूर्खःपाकमूर्खोनिशम्यतां कद
यःकोप्यभूत्क्वापिमूर्खश्रेष्ठकोमहाधनः सभार्यश्चसदाभुंक्तेसक्तूंलवणवर्जितान् अन्नस्यान्यस्यबुबुधेनैवस्वादं-
सजत्तुचित् एकदाश्रेष्ठितोधात्रासभार्यामब्रवीदिदं क्षीरिणीप्रतिजातामेश्रद्धातामघमेवच तथेतितस्यभार्या
सापपावक्षीरिणींतदा तस्छोवाभ्यंतरोगुप्तंसढक्कःशयनंश्रियः दृष्ट्वाप्राङ्गणकःकंश्चिदत्रमेमास्मभूदिति ताव
तस्यसुहृद्धूर्तःश्चक्रस्तत्रैवआययौ क्वतेभर्त्तेतिपप्रच्छसचतांतस्यगेहिनी साप्यद्दतोत्त्ररातस्यप्राविशत्स्तुरंतिकं-
आख्यातमित्रागमनासोपिभीतोजगादतां उपविश्यैहरुदतीपादावादायतिष्ठमे मर्त्तोमिम्त्तत्वेवंवदेश्चसु-
हृतंतथा ततोगतेस्मिन्नेवाभ्यांभोक्तव्यक्षीरिणीसुखं इत्युक्तातेनयावत्सापप्रवृत्तारुदितुंतदा तावत्प्रविश्यसो
ऽब्रवीत्किमेतदितितांसुहृत् मर्त्तोमृतोमेपश्येतितयोक्तःसव्यचिंतयत् कथंवंतीमयादृष्टासुखिताक्षीरिणीमि-
यं क्वाधुनैवविपन्नोयमेतद्भर्त्ताविनारुजं नूनंमांप्राङ्गणंदृष्ट्वाततमाभ्यामिदंमृषा वञ्चयानैवगंतव्यमित्या
लोच्योपविश्यसः धूर्त्तोहामित्रहामित्रेत्याक्रंदंनतस्यतस्थिवान् श्रुत्वाक्रंदाःप्रविश्याथबांधवाम्रतवस्थितः

बृ०त्क०१०
५८
58

श्मशानंभीतरक्षंत्वनेत्वमासन्समुद्यताः उत्तिष्ठबांधवैर्यावदेतैर्नीत्वानदह्यसे इत्युपाध्यवदत्कर्णमूलेभार्या
तदाचतं मैवंशंगेयंरक्षोमेक्षीरिणीभोक्तुंमिच्छति नोत्तिष्ठामितदेतस्मिन्नगतेहंमृतोयदि प्राणेभ्योप्यर्थहृष्टि
र्हिमादृशानांगरीयसी इतिप्रत्यब्रवाज्ज्ञार्य्यामुपाध्यावसतांजडः ततस्तेनऊमित्रेणानीवातैःस्वजनैःसहः
दृह्यमानोपिनिश्चेष्टोदहेनामारणाद्वचः एवंसमूढोविजहौप्राणान्नक्षीरिणीपुनः क्लेशार्जितंचबुभुजेतस्या
न्येर्हेलयाधनं श्रुतःकदर्पःश्रूयतांममीमार्जारभीतिकाः उज्जयिन्यामुपाध्यायोमुग्धकोप्यभवमवे तस्य
निद्रारतस्याभून्मूषकोपद्रवोनिशि तच्छिन्नस्तत्रसुहृदेसकस्मैचिदवर्णयत् मार्जारःस्थापनीयस्तेसोत्रभक्ष
तिमूषकान् इतिसोपिसुहृद्विप्रस्तमुपाध्यायमब्रवीत् मार्जारःकादृशःक्वासेनसदृष्टचरोमया इतिब्रुवत्युपा-
ध्यायेतत्सुहृत्सोब्रवीत्पुनः काचरेलोचनेयस्यकर्णःकपिलधूसरः पृष्टेचल्लोमशंचर्मरथ्यास्तटतिचोरसः त
देभिस्त्वमभिज्ञानैरन्विष्यानाययात्सुतं मित्रमार्ज्जारमित्युक्त्वातत्सुहृत्सययौगृहं ततःशिष्यानुपाध्यायःसजा-
गादजडोनिजां अभिज्ञानानियुष्माभिःश्रुतान्येवस्थितैरिहा तदन्विष्यतरथ्यासुमार्ज्जारंतमिहक्वचित् त
थेतितेगताःशिष्यास्तत्रतत्रतमीक्षितुं तेभीतापिनतैर्दृष्टोमार्ज्जारसकदाचन अथैकतेबटुरथ्यासुखादेक्षं
तनिर्गतं काचांनेत्रयुगलंवर्णधूसरपिंगलं दृष्टपरिदधानंचल्लोमशंहरिणाजिनं दृष्ट्वातंसैषमार्ज्जारःप्रा- राम ५८

न्तोस्माभिर्यथाश्रुतः इत्यवष्टभ्य तं निन्युरुपाध्यायांतिकं च ते उपाध्यायोपि पित्रोक्तैर्युक्तं मार्जारलक्षणैः तं दृष्ट्वा
स्थापयामास रात्रौ तत्र भवांतरो मार्जारो नूनमस्मानिति मेने सोपि बटुर्जडः मार्जारोत्थां कथां श्रुत्वैवं नात्मनस्तैरबुद्धिभिः
स च भीतो बटुः शिष्योत स्वविप्रस्य येन तत् उपाध्यायस्य तस्योक्तं मे श्रान्मार्जारलक्षणं प्रातः सोत्रागतो विप्रो ब
टुमंतर्विलोक्य तं इह केनायमानीत इति भीतानुवाच तान् श्रुतोपलक्षणास्त्वत्तो मार्जारोस्माभिरेव सः आनी
त इत्युपाध्यायो भीतशिष्याश्च ते ब्रुवन् ततो विहस्य सोवादीद्द्विप्रो मूढाः क्व मानुषः क्व च तिर्यक्स मार्जारश्च उ
ष्यात्पुत्रवानपि तद्बुद्ध्वा तं बटुं मुक्त्वा ते ब्रुवन्मंदबुद्धयः तर्ह्यन्विष्यानयामस्तं मार्जारं तादृशं पुनः एवमुक्ते व
तो मूढान् जनस्तत्र जहास तान् अज्ञता नाम कस्येह नोपहासोत्र जायते मार्जारभीताः कथिताः श्रूयतामपरो
प्यमा आसीद्बहूनां मुग्धानां मुख्यो मुग्धो मठे क्वचित् स केन विद्वाच्यमानाद्धर्मशास्त्रात्कदाचन तडागकर्तु
रश्रौषीदमुत्र सुमहत्फलं ततः स धनसंक्षयेण विपुलं वारिपूरितं तडागं कारयामास नातिदूरे निजाश्रमात् एक
दा स तडागं तं द्रष्टुं मुग्धाग्रणीर्गतः केनाप्युद्घाटितांस्तत्र पुलिनांस्तटानुव्यलोकयन् तथैवागत्य चान्येद्युरुत्खा
तं तटमन्यतः दृष्ट्वा तस्य तडाकस्य सोद्वेगः स व्यचिंतयत् प्रातः प्रभातादारभ्य स्थास्याम्यहैव वासरं द्रक्ष्यामि कः
करोत्येतदित्यालोच्य गतः प्रगे अन्येद्युर्यावदेत्यास्ते तावत्तत्र ददर्श सः दिवोवतीर्य शृंगाभ्यां खनंतं वृषभं तटं दि

ह०कौ०१०
५९
59

व्योवृषोयंतत्किंनदिवंयामिसहामुना इत्युपेत्यवृषस्यास्यहस्ताभ्यांपुछमग्रहीत् ततःपुछाग्रसंलग्नंतंभौतमु-
त्क्षिप्यतेनसः क्षणान्निनायकैलाशंस्वधाममभगवान्वृषः तत्रदिव्यानिभक्ष्याणिमोदकादीन्यवाप्यसः भुंजानो
न्यवसद्भौतोदिनानिकतिचित्सुखं गतागतानिकुर्वाणंसदृष्ट्वातंमहावृषं अचिंतयतभौतानांमुख्योदैवेनमोहितः॥
गछामिवृषपुछाग्रलग्नःपश्यामिबांधवान् कथयित्वाद्भुतमिदंतथैवैष्याम्यहंपुनः इतिसंचिंत्यवृषभस्यैकदोपे
त्यतस्यसः अवलंब्यागतःपुछंतंस्ववृत्तांतंशशंससः ततःसर्वैश्रुताश्चर्याभौतास्तेनमथाब्रुवन् प्रभातेनयतत्रा
स्मानपिभोजयमोदकात् तछुत्वासथेत्येतानुक्तिमुक्त्वापरेदिने तडागनाममनयत्सचतत्रायायोवृषः जग्राहतस्य
लांगूलमुखःपाणिद्वयेनसः तस्यापिगृह्णाश्चरणावन्यस्तस्यापिचेतरः इत्यान्योन्यांघ्रिलग्नैस्तैर्भौतैर्याबद्धशृंख-
ला रचितासवृषस्तावदुत्पपातजवात्ततः यातेतस्मिंश्चवृषेलांगूलालंबिभौतके मुख्यंभूतंतमप्राक्षीदेकोभौ
तोथदैवतः श्रद्धामाख्याहिवस्तावद्यत्रैषसुलभादिवि कियत्प्रमाणाभवतामोदकाभक्षितादितिः ततोभ्र
ष्टानुसंधानोवृषपुछंविहायतं पद्मकोशोकरौतत्वासशिष्योभौतनायकः इयत्प्रमाणाइत्याशुयावत्तान्प्र-
तिवक्तिसः तावत्सोन्येचतेसर्वेखान्निपत्यविपेदिरे वृषोब्रायाश्चकैलाशंजनोदृष्ट्वाजहासचः दोषायनिर्विम
र्शैवभौतप्राश्नोत्तराक्रियाः श्रुतानुगामिनोभौताःश्रूयतामपरोप्ययं कश्चिद्भौतोविसस्मारमार्गंग्रामांतरंव्र- राम: ५९

जन्. ततोर्नदीतटस्थस्य गजस्योपरिवर्त्मना इत्युच्यते स्म पंथानं परिपृष्टं जनैश्च हः ततः स्तस्य तरोः प्रवंगवाहुः
समुग्धधीः एतत्प्रष्टेन मे पंथा उपदिष्टो जनैरिति तत्पृष्टे सर्प्यतश्चास्य भग्नान्यर्यतवर्त्तिनी शाखा न नाम-
यत्नेन प पाताल्लंब्य नैषतां तामालंब्य स्थितो यावत्तावत्तेन पथा ययौ आरोहेणोपविष्टेन नद्यां पीतजलः करी
तं दृष्ट्वा तरुशाखाग्रलंबी भीतः स दीनवाक् महाभाग गृहाणेति हस्त्यारोहमुवाच तं हस्त्यारोहश्च भीतं तमवतार-
यितुं तरोः पादयोर्ग्रहीद्द्वाभ्यां पाणिभ्यामुत्क्षितां कुशः तावच्च निर्गत्य गते गजे भीतस्य तस्य सः ललंबे पादयोर्ह-
स्तिएको वृक्षाग्रलंबिनः ततः स त्वरया भीतो हस्त्यारोहं तमभ्यधात् यदि जानासि तद्गीतं यत्किंचित् दीयतां त्वया
वृतो वतारये ज्ञात्वाप्युबुद्धा गत्यनौ जनः पतितायन्यथाधस्तादुरीदाचामियं नदी इत्युक्तः स गजारोहस्तेन मंजुतया
जगौ यथा स एव भीतोऽत्र परितोषमगात्परं साधुवादं च स ददद्विस्मृत्योज्झितपादपः गातुं प्रावर्त्तत द्वाभ्यां हस्ताभ्यां-
कोटिकां जडः तच्चाणां च निपत्यैव सहस्त्यारोह एव सः नद्यां विपेदे मूर्खैर्हि संगः कस्यास्ति शर्मणे इत्याख्याय कथां
भूयो वत्सेश्वरसुताय सः गोमुखः कथयामास हिरण्याक्षकथामिमां अस्ताद्हिमवत्कुक्षौ देशः पृथ्वीशिरोमणिः क-
श्मिर इति विद्यानां धर्मस्य च निकेतनं तत्राधिष्ठानमभवद्धिरण्यपुरनामकं कनकाख्य इति ख्यातस्तत्र राजा ब-
भूव च तस्यात्र प्रभादेव्यां शंकराराधनोद्भवः पुत्रो हिरण्याक्ष इति क्ष्मापतेः समपद्यत स जातु गुलिकाक्रीडां कुर्वन्नु

लिकयाबलात् तापसीं राजतनयो मार्गोयातामताडयत् सा तापसा जितक्रोधा राजपुत्रं विहस्य तं योगीश्व
रीहिरण्याक्षमुवाचाविकृतानना त्वयौवनादियत्येवदर्प्पश्चेत्तवतद्यदि मृगांकलेखा त्वां भगवत्युच्यतां त्वया
ततस्तं साब्रवीदस्ति शशितेजा इति श्रुतः विद्याधरो द्रोहिमवदचले ऽमहायशाः मृगांकलेखा तस्यैषा तनया
वरकन्यका रूपेणेषु खेचरेंद्राणां निशासन्निउकपदा सा चानुरूपा भार्या ते तस्यास्त्वमुचितः पतिः इत्युक्तः सिद्धता
पस्या हिरण्याक्षो जगाद तां कथं भगवति प्राप्या मयासा तर्हि कथ्यतां तच्छ्रुत्वा सा हिरण्याक्षं तं योगीश्वर्य्यमभा
षत गत्वाहं तत्कथाख्यानादुपलप्स्ये तदाशयं आगत्य चाहमेव त्वां तत्र नेष्याम्यतः परं इहास्ति यो मरेशाख्यो देव
स्तत्केतने त्वया प्रातः प्राप्यास्मि नित्यं हितमर्चितुमुपैम्यहं इत्युक्त्वा नभसा धायाता तापसी सास्व सिद्धितः तस्मान्मृ
गांकलेखाया निकटं त्रुहिनाचलं तस्यै तत्र हिरण्याक्षगुणानुक्त्वा शशंस सा तथा यथा दिव्यकन्या सा तत्युत्कैव
मुवाच तां तादृशं चेन्न भर्त्तारं प्राप्नुयां भगवत्यहं तन्निष्फलेन किं कार्यममुना जीवितेन मे इत्यारूढः स्मरावे
शानीत्वा तत्कथया दिनं मृगांकलेखा तापस्या सहोवास तया निशां तावत्सोपि हिरण्याक्षो तच्चिंतानातवास
रः सुप्तः कथंचिज्जगाद गौर्या स्वप्ने निशाक्षये विद्याधरः सन्प्राप्तस्त्वं मुनिशापेन मर्त्यतां तापस्याः करसंस्पर्शा
दैतस्या मोक्ष्यसे ततः मृगांकलेखां चतत तस्तामाशु परिणेष्यसि तच्चिंता नैव कार्या ते पूर्वभार्या हि सा तव इ

स्यादिश्यैवसादेवीतिरोभूत्तापसोपिच प्रबुध्यप्रातरुत्थायचक्रेस्नानादिमंगलं ततोमरेश्वरस्याग्रेगत्वातस्यप्रणाम्य-
तं यत्नसंकेतकंतस्यास्तापस्याविहितंतया अत्रांतरेचकथमप्यात्तनिद्रांस्वमंदिरे मृगांकलेखामपितांस्वप्नेगौ-
रीसमादिशत् क्षीणशापंहिरण्याक्षंजातंविद्याधरंपुनः करस्पर्शात्तापस्यापतिंप्राप्स्यस्यलंशुचा इत्युक्त्वांतर्हि-
तायांचदेव्यांप्रातःप्रबुध्यसा मृगांकलेखातांतापस्यैतस्यैस्वप्नंशशंसतं सातद्बुद्ध्वैवचागत्यभूर्लोकंसिद्धतापसी स्थि-
तंक्षेत्रेमरेशस्यहिरण्याक्षंतमभ्यधात् एहिविद्याधरंलोकंपुत्रेत्युक्त्वाकरेणसा प्रणतंतंसमादायबाहावुदपत-
न्नभः तावच्चसहिरण्याक्षोभूत्वाविद्याधरेश्वरः स्मृत्वाशापक्षयाज्जातिंतापसीतामभाषत हिमाद्रौवज्रकूटाख्ये
पुरेजानाहिमामिमं विद्याधराणांराजानंनाम्नाप्यमृततेजसं सोहमुल्लंघनक्रोधाच्छापंप्राप्यमुनेःपुरा मर्त्यलोक-
मुपागत्वत्करस्पर्शनावधिः शप्तस्यमेतदाभार्यायादुःखाद्जहात्तनुं सैषामृगांकलेखाद्जातासर्वप्रियामम इ-
दानींचवयासाकंगत्वाप्राप्स्यामितामहं त्वत्करस्पर्शनस्यशांतःशापोप्यसौहिमे इतिब्रुवंस्तयासाकंतापस्याग-
गनेनसः जगामामृततेजास्तंहिमाद्रिंखचराधिपः मृगांकःलेखामुद्यानस्थितांतत्रददर्शसः साप्यपश्यत्ता-
मायांतंतापस्यावेदितंतया चित्रंश्रुतिपथेनादौप्रविश्यान्योन्यमानसं अनिर्गत्यप्रविशतांदृष्टिमार्गेणातो
पुनः विवाहसिद्धयेपित्रेत्वद्वेदंकथ्यतामिति ऊचेमृगांकलेखात्रतापस्याप्रौढयातया: ततोलज्जानतमुखी

तामन्वा पितरं निजं सखीमुखेन तत्सर्वं बोधयामास तत्क्षणात् सोपि स्वप्ने त्वया दृष्टस्तात पिता खेचरेश्वरः तम
नैषीत्स्वभवनं संमान्यामृततेजसं दृष्टौ मृगांकलेखां च तस्मै तां च यथाविधि ततो दाहं च तं वत्स कूटं तत
स्त्रयो पुरं तत्र सोमृततेजस्त्वं राज्यं प्राप्य सभार्यकः आगातः सिद्धतापस्यामर्त्यत्वे पितरं निजं कनकाक्षं
समासाद्य च भाग्यैः प्राप्य महीतलं मृगांकलेखया साकं तामृद्धिं बुभुजे चिरं इति सर्वं कर्म नियतं भवितव्यं य
स्य जगति यज्जंतोः तदयं तेन स पुरतः पतितं प्राप्नोत्यसाध्यमपि एवं गोमुखकथितां शक्तियशस्सुत्सुको निशाम्य
कथां तां यनेनिशि नरवाहनदत्तो निद्रामसौ भेजे ॥ इतिश्रीभट्टसोमदेवविरचिते कथासरित्सागरे शक्तियशो
लंबके नवमस्तरंगः ॥ ९ ॥ आदितः पंचषष्टितमस्तरंगः ६५ ततोन्येद्युः पुनर्नक्तं विनोदार्थं स गोमुखः न
रवाहनदत्ताय कथामेतामवर्णयत् धारेश्वराभिधे देशे सिद्धिक्षेत्रे पुरावसत् उपास्यमानो बहुभिः शिष्यैः कोपि म
महामुनिः सोब्रवीज्जातु शिष्यान्स्वान्युष्मासु यदि केनचित् अपूर्वमाक्षितं किंचिद्बुतं वा तन्निवेद्यतां इत्युक्ते तेन
मुनिना शिष्य एको जगाद तं मयाश्रुतमपूर्वं यत्तद्दाख्यामि निशम्यतां विजयाख्यमहाक्षेत्रं कश्मीरेष्वस्ति शांभ
वं तत्र प्रव्राजकः कश्चिदासाद्विद्याभिमानवान् जया सर्वत्र भूयासमित्याशंसन्प्रणम्य सः शंभुं प्रतस्थे वादाय
पुरे पाटलिपुत्रके गच्छंश्च मार्गे तिक्रामन्वनानि सरितो गिरान् प्राप्याटवीं परिश्रांतो विशश्राम तरोस्तले क्षणा

च्चवापाशिशिरे तत्र रूक्षधूसरं ददर्श धार्मिकं दंडकुंडिकाहस्तमागतं कुतस्त्वं कुत्र यास्यसीति निषण्णोत्र च तेन ना-
सः प्रव्राजकेन पृष्टः सन्नित्यभाषत धार्मिकः आगतोहं सखे विद्याक्षेत्रात् पाटलिपुत्रतः कश्मीरान् यमितत्रत्या-
न् जेतुं वादेन पंडितान् श्रुत्वैतद्धार्मिकवचः स च प्रव्राड् अचिंतयत् इहैको न जितोयं चेन्मया पाटलिपुत्रकः ता-
त्तत्र गत्वा जेष्यामि कथमन्यान् बहून् अहं इत्यालोच्य स तं प्रव्राड् आराक्षिप्याहसन् धार्मिकं विपरीतमिदं किं ते वद
धार्मिक चेष्टितं कुतः धार्मिको मुमुक्षुस्त्वं क्व वादो व्यसनांतरः वादाभिधानबंधेन संसारान्मोक्षमेष्यसि शमय
स्यग्निनोष्माणं शीतं हंसि हिमेन च जनितावर्त्मसि यापापानां नावा मूढ महोदधिं वातेन ज्वलितं वह्निं निर्वापयि-
तुमीहसे ब्राह्मं शीलं क्षमा नाम क्षात्रमापन्नरक्षणं मुमुक्षुशीलं च समः कलहो राक्षसं स्मृतं तस्माच्छांतेन चित्तेन
भवितव्यं मुमुक्षुणा निरस्तद्वंद्वदुःखेन संसारक्लेशभीरुणा अतः शमकुगरोणभिधामं मत्त वसादयं हेतुवादाभि-
मानां ब्रुसे कं तस्य तु मा स्म दाः इत्युक्तो धार्मिकस्तेन परितुष्टः प्रणम्य तं गुरुर्भवान् ममेत्युक्त्वा जगाम स यथागा-
तं स प्रव्राड् हस्थितो तत्रैवं तरुमूले तदंतरात् यक्षस्यालापमश्रृणोत् क्रुद्धो भार्यया सह करं ददाति या वत्स
प्रव्राजितावदत्र सो यक्षः पुष्पस्रजा भार्यां नर्मणा तामताडयत् तावच्च मृतकल्पं सा तत्त्वात्मानं शशगामदृषाः
तस्मिन् तत्परिवारश्च मुक्ताक्रंदो रुगित्यभूत् चिराच्चागतजीवे वसा दृशा बुद्धमालयन् किं त्वया दृष्टमिति ना-

बृं०कं०१०
६२
62

यक्षीप्राक्षीत्ततः यतिं अथमित्येवसावोचत् त्वयाहं मालयायदा अन्याहतातदापश्यं तत्रस्थं पुरुषमागतं पासह-
स्तंज्वलन्नेत्रं प्रांशुमूर्द्धशिरोरुहं भयानकं निजछायामलिनात्ततदिक्तटं तेननीताहमभवं दुष्टेनयमसादनं
स्माजिताम्रियत्र तत्रत्यैस्तैर्निवार्याधिकारिभिः एवंतयोक्तेयक्षिण्यायाहसन्यक्षोजगादतां अहोविनेंद्रजालेन-
स्त्रीणांचेष्टानविद्यते कोमृत्युः कुसुमाधमतादाह्यन्तिकायमालयात् मूढेपाटलिपुत्रस्त्रीवृत्तांतोनश्रुतस्त्वया तस्मि
न्हिनगरेराजायोस्तिसिंहाक्षनामकः तद्भार्यामंत्रिसेनानीपुरोहितभिषक्वधूः सहादायत्रयोदश्यां शुक्लपक्षेकदा
चनसनाथात्ततद्देशाग्रागाद्द्रष्टुंसरस्वतीं तत्रतान्स्नानमिलितैः सर्वैः कुब्जांधपंगुभिः व्याधितैरित्ययाच्यंतभूपा
लप्रमुखांगना रोगातुराणांदीनानामौषधंनःप्रयच्छत येनमुच्यामहेरोगान् कुरुतार्तानुकंपनं समुद्रलहरीलोलोवि
द्युत्स्फुरितभंगुरः जीवलोकोऽयंयात्राघस्वाज्ञाणसुंदरः तदस्मिन्नत्रसंसारेसारंदीनेषुयादया तपोपुण्यचयश्चा-
नंगुणवान्कोनजीवति अघस्यकिंचदानेनसुहितस्याशनेनकिं किंचंदनेनचशीतालोः किंघनेनहिमागमे त
देतानुद्धरतनः तपणानामथापदः इत्युक्ताव्याधितैस्तैस्तान्नृपभार्यादयोब्रुवन् सुष्टुपयस्ते जल्पंतितत्पणाद्व्या
धिताइमे सर्वस्वेनाप्यतोस्माभिःकार्य्यमेषांचिकित्सितं एवमन्योन्यमालप्य देवीमभ्यर्च्ययोषितः व्याधितांस्ता
न्स्वभवनान्यानिन्युस्ताःपृथक्पृथक् स्वभर्तॄन्प्रेर्य्यतेषांचमहासत्वामहाधनैः चिकित्सांकारयामासुर्नेत्रस्तु

राम
६२

अतदंतिकात् सहवासाच्चतैरेवसंगमुज्झडमन्मथः तथाययुस्ताःसंसारंतेन्मयंददृशुर्यथा क्रोगिणोमीत्वयणाभ-
र्तारश्चन्नपादयः इतिनव्यान्मशत्रासांमन्मथार्धार्तितंमनः ततश्चताअसंभाव्यरोगिसंभोगसंभवैः नवदंतक्षतै
र्युक्ताःपतयोददृशुर्निजाः तेचभूपालतन्मंत्रिसेनापतिमुखादयः तदाचक्षुःसमसंदेहाःपरस्परमतंद्रिताः ततोरा
जाब्रवीदन्यान्नयंतिष्ठतसंप्रति अहमद्यनिजांभार्यांतावत्पृच्छामियुक्तितः इत्युक्त्वातान्विसृज्यैवगत्वावास-
गृहंचसः प्रदर्शितस्नेहभयोभार्यामपृच्छतांप्रियः दृष्टःकेनात्रतोयंतेक्षतोकेननखैःस्तनौ सत्यमाख्याहिचेदस्-
स्तिश्रेयस्तेनान्यथापुनः इत्युक्तातेनराज्ञासाराज्ञीतंतकमब्रवीत् अवाच्यमप्यधन्याहंवच्म्याश्चर्यमिदंशृणु चि
त्रभित्तेरितोरात्रौपुमांश्चक्रगदाधरः निर्गत्यैवोपभुंक्तेमांप्रातश्चात्रैवलीयते यदंगंचंद्रसूर्याभ्यामपदृष्टंनजा
तुमे तत्रेदृगेत्यक्रियतेतेनावस्थातेत्वयि एवंतस्यास्तुदुःखायाएतद्ब्रुवान्नृपोवचः प्रत्यैतिस्मतथामूर्खोमायामाशं
क्यवैश्रवी शशंसमंत्र्यादिभ्यास्तेपितथाजडाः मत्वाच्युतोपभुक्ताःस्वाभार्यानदूषयन्किलाव्रजन् इत्यसत्यैकरचना म॰८
श्चवाराःक्षत्रियःशठाः वंचयंमेजडमतीन्नाहंमूर्खोस्मितादृशः इतियक्षोब्रुवन्भार्यांसविलक्षांचकारतां त
त्रप्रव्राजकोश्रोषीत्सर्वंतरुतलेस्थितः ततःकृतांजलिर्यक्षंतंसप्रव्राड्विजिज्ञपत् भगवन्नाश्रमात्प्राप्तस्तवा
हंशरणागतः तत्क्षमस्वापराधंमेत्वद्वचोयन्मयाश्रुतं इत्युक्तःसत्यवचनाद्यक्षस्तस्यतुतोषसः सर्वस्थानग

ताख्योहं यक्ष स्तुष्टस्तवास्मि च महार्णवा मित्यूचे प्रवाङ्ग्रक्षे गातेन सः मन्युमस्यां स्वभार्यायामात्तथा एव मेवमेः
वोस्त्विति तमाह स्मस प्रव्राडिति गुह्यकं ततः स यक्षोवादीत्तं तुष्टोस्मि सुतरां तव तदेषते वरोदत्तो मया न्यत्प्रार्थ्यतामि-
ति ततः प्राव्राजकोवादीत्तर्ह्ययमेव रोपाः अद्य प्रभृति पुत्रं मां जानितं दंपती युवां श्रुवैतत्स भार्योपि प्रत्यक्षीभू
य तत्क्षणं यक्षस्तमब्रवीद्बाढं पुत्र पुत्रस्त्वमावयोः अस्मत्प्रसादान्न च ते भविष्यति विपक्वचित् विवादे कलहे यूते
विजयैवाभविष्यसि इत्युक्त्वांतर्हितं यक्षं तं प्रणम्याति वाह्य च रात्रिमत्रायं योप्रव्राड्ग्रतं पाटलिपुत्रकं तत्र द्वास्थ
मुखेनांतः प्रङ्गान्सिंहाक्ष भूपते काश्मीरागतमात्मानमाख्याति स्म विवादिनं अनुज्ञात प्रवेशश्चतेनास्थाने महाभुजाः
प्रविश्यात्र स्थितान्वादाद्यायाविक्षेपस पंडितान् जित्वा वादेन तान्यक्षवरमाहात्म्यतो खिलान् राजाग्रे स पुरस्तोषांचका
राक्षेपमादृशं चित्रभित्तेर्विनिर्गत्य गदाचक्रधरः पुमान् दृष्ट्वा धौतोष्ठी दर्शनैः क्षतस्तनतटानखैः तत्वोपभुज्याग्नौ
सतद्भित्तावेवलायते एतत्किमिति वः पृष्टा मुत्तरं मे त्र दायतां एतद्बुद्ध्वानतस्याव बुधाः प्रतिवचो ददुः परमार्थ प्रम
जानाना अन्योन्याननदर्शिनः ततो राजा स सिंहाक्षः स्वयमेव तमभ्यधात् यदेतदुक्तं भवता तद्व्याचक्ष्व त्वमेव नः
एतद्बुद्ध्वा स राज्ञोस्मै प्रव्राट् स्वैरं शशंस तत् तद्भार्या व्याज चरितं यक्षादश्रावि तेन यत् ततत् ऊर्यादभिषंगं पाप
राम
न्नष्यैक हेतवे स्वामिः कदाननजनस्त मित्यूचे न्तपं च सः तुष्टस्तस्मै निजं राज्यं राजा दातुमियेष सः स तु स्वदेशे कौरा-
६३

तःप्रव्राट्तत्राग्रहीच्चदा तदासंमानयामासराजारत्नोत्करेणतं आत्तरत्नस्ततःकश्मीरान्प्रव्राट्स्वंदेशमागमत् त
त्रयक्षप्रसादेनसनिर्द्वन्द्वःसुखंस्थितः इत्याख्यायसशिष्यस्तंमहामुनिमभाषत अहंप्रव्राजकात्तस्मादेवैतच्छ्रु
तवानिति ततःसविस्मयःस्वान्यशिष्यश्चिरमभून्मुनिः इत्युक्त्वागोमुखोभूयोवत्सेशात्मजमब्रवीत् एवमेतानि
कुस्त्रीणांचेष्टितानिचवेधसः विचित्राणिमहादेवलोकस्यचरितानितु इयंचश्रूयतामन्यानार्यैकादशमारिका।
ग्रामवासीपुमानासीत्कुटुंबीकोऽपिमालवे तस्योदपादितनयाद्वित्रिपुत्रकनीयसी तस्यांचजातमात्रायांभार्याता-
स्यव्यपद्यत ततोऽल्पैर्दिवसैस्तस्यपुत्रएकोऽप्यधाद्दिवं तस्मिन्विपन्नेभ्रातातस्यद्वितीयःशृंगाहतोमृतः सोऽथकन्यांकुटुं
बीस्वांनाम्नाचक्रेत्रिमारिकां त्रयोऽनयालक्षणयाजातयामारिताइति कालेनयौवनस्थांतांपितुस्तस्माद्याचत।
त्रिमारिकामाढ्यपुत्रःकश्चित्तत्ग्रामसंभवः पिताचतस्मैप्रादात्तांसयथावत्ततोऽसवः तेनभर्त्रासहास्तचकालं-
कमपितस्यसा अचिराच्चततस्तस्याभर्तापंचत्वमागतः दिवसैरेवसान्यंचचपलापतिमग्रहीत् सोऽल्पैनैवचकाले-
नविपत्तिंप्रापतत्स्यतिः ततःसायौवनोन्मत्तातृतीयंपतिमाददे सोपितस्याविपन्नोऽभूत्पतिघ्नाःपतिरन्ववत् एवं
क्रमेणापतयोदशतस्याविपेदिरे ततोहास्येनसानाम्नाप्रप्रथेदशमारिका डाकिनीभर्तृभक्षेयमितिलोकोब्र-
वाच्चताम् अथान्यभर्तृस्वीकारात्पित्राज्ञातेनवारिता सावर्ज्यमानाचजनैस्तस्थौतस्यपितुर्गृहे एकदाचविवे

बृ०क०१०
६४

64

सा

शात्रपांथोभव्यात्ततिर्युवा एकरात्रिनिवार्थ्यतत्पित्रानुमतोतिथिः तद्दृष्ट्वातऽतमनास्साभवद्दशमारिका: पांथोपि
तद्गुणैर्दृष्ट्वासोभूवत्तदभिलाषुकः ततःसामारमुखितत्रासापितरमभ्यधात् एकतेनमहंतातदृष्टणेमिपथिकं पतिः।
विपश्यते चेद्देष्टोपिग्रहीष्यामिततोब्रुतं एवंभ्रूत्वतिपांथेतांब्रुवतीमपिताब्रवीत् मापुत्रिल्लज्ञामहतीदशतेपत
योमृताः तदेतस्मिन्नपिमृतेहासिष्यतेतराांजनः तद्गुत्वैवत्रपांत्यस्काप्यथिकोपिजगादसः नाहंम्रियेदशमृताः
क्रमाद्भार्यामममापिच समावावांशयाम्पत्रपादस्पर्शेणधूर्जटेः इत्युक्तेतेनपांथेननाचित्रायततत्रकः बुधश्चमिः
लितैर्ग्राम्यैर्दत्तानुमतयातया दशमारिकयासोथपथिकोजगृहेपथिः तेनसाकंचयावत्सकालंकमपितिष्ठतिः
तावद्भातद्दाराक्रांतःसोपितस्याःक्षयंययौ ततःसाहासिनीग्राम्यैर्मध्येकादशमारिका विगणागंगातटंगत्वाप्रव्रज्या
मेवशिश्रिये इत्युक्त्वाहसितंवत्सराजपुत्रंसगोमुखः भूयोब्रवीत्कथामेकांशृणुमांदांतजीविनः पुमान्कश्चि
द्दरिद्रोभूद्ग्रामेक्वपिकुटुंबवान् एकएवबलीवर्दस्तस्यचाभूद्गृहेधनं सनित्यंस्वोशनाभावासादत्यपिकुटुंब
के सोपवासोपितंदांतंविक्रीणातिनलोभतः गत्वाऽविध्यवासिन्याःपुरतोदर्भसंस्तरे पतित्वासतपश्चक्रेनिरा
हारोथकाम्यया उत्तिष्ठैकोबलीवर्दःसर्वथाधनमस्तिते अतस्तमेवविक्रीयजीविष्यसिसदासुखं इत्यादिष्ट
स्तयास्वप्नेदेव्याःप्रातःप्रबुध्यसः उत्थायपारणांकिंचित्कृत्वास्वगृहमाययौ एत्याप्यधारोविक्रातुंनोक्षाणंतंशशा

राम
६४

कस्मः विक्रांतेस्मिन्नहंनिस्वोनैववर्त्तेयजात्विति अथतंकथितस्वप्नंदेव्यादेशप्रसंगतः उपवासतत्रशंकश्चिदुवाचसु-
मतिःसुस्त एकएवास्तिदांतस्तेतत्त्वंविक्रायसर्वदा जाविष्यसातिदेव्योक्तंतज्ज्ञानंमूढचत्वया तद्विक्रायैतमुक्ता-
णांनिर्वाहयकुटुंबकं ततोभविष्यत्यन्यस्तेस्ततश्चान्यस्ततोपरः इत्युक्तस्तेनमित्रेणाग्रामाणःसतथाकरोत् ऐकैकद्द
ययणपश्चजिवाचसुततंमुखां एवंफलतिसर्वस्यविधिःसत्वानुसारतः तस्मुसत्वोभवेत्सत्वहानंनहृणुतेश्रियः शृणु
चैकांकथामन्यांधूर्त्तस्याकमंत्रिणः आसात्पृथ्वीपतिर्नामगननगरोदक्षिणापथे तद्राष्ट्रेकोप्यभूद्धूर्त्तःपावचनजाव-
कः सचैकदासहेबवादसंतुष्टोव्यचिंतयत् धूर्त्तत्वेनेदृशाकिंमेयदाहारादिमात्रकृत् प्राप्यतेमहतायेनश्रास्ता-
दृङ्ंकरोमिकिंः इत्यालोच्यवणिग्वेशमत्युदारंविधायसः उपासर्पत्प्रतीहारंगत्वाद्वारंमहीपतेः तन्मुखेनप्रविश्यां
तःप्राभृतंचोपनायसः एकांतेमेस्तिविज्ञप्तिरितिविज्ञापयन्नृपं राजापिवेषभ्रांतेनप्राभृतावर्जितेनच तथेतिर
चितेकांतस्तमेवंसव्यजिज्ञपत् दिनेदिनेमयासाकमास्थानेसर्वसंनिधौ भूत्वैकांतेकथालापंक्षणमेकंकुरुप्रभोः
तावताहंप्रतिदिनंदीनारशतपंचकं दद्याम्युपायनंदेवस्यार्थयेनत्तुकिंचन तच्छ्रुत्वाचिंतयद्राजाकोदोषःकिमयंम
मः गृहीत्वायांतिदीनारान्ददातिप्रत्युतान्वहं महातावणिजासाकंकथालापेत्रकोत्रया इतिसंप्रतिपद्येतद्राजात
स्तथाकरोत् सोपितस्मैददौराज्ञेदीनारांस्तान्यथोदितान् लोकश्चतंमहामंत्रिपदंप्राप्तममन्यत एकस्मिंश्चदिने-

बृ०क०१०
६५
65

धूर्तैर्मुक्तःपश्यन्नियोगिनः साकूतंसुखमेतस्यचक्रेराज्ञासमंकथां निर्गतश्चवस्तितेनमुखालोकनकारणं एत्याधिका-
रिणामध्यस्तंस्वैरंसमभ्यावदन् दशोमेलुंगितोनेनेत्येवंतेकुपितोनृपः मयातस्तेसुखंदध्वंशमयिष्याम्यहंचततः इत्यु
क्तस्तेनसोलाकसंत्रिणाभयोगृहं आगत्याधिनतेतःस्वर्णसहस्रंतस्यदत्तवान् अन्येद्युश्चसमंराज्ञाकथांतेनवात
थैवसः निर्गत्यधूर्तोवादान्तंनियोगिनमुपागतं युक्तियुक्तैर्मयावाक्यैस्तवराजाप्रसादितः धीरोभवाधुनाहंतेसर्ववि
घ्नरक्षकः इतिस्वान्तत्यतंयुक्त्याविससर्जचसोपितं अधिकारमदात्तैस्तैरुपचारैरुपाचरत् एवंक्रमेणसर्वेभ्यो
नियोगिभ्यःसबुद्धिमान् राजभ्योराजपुत्रेभ्यःसेवकेभ्यश्चयुक्तिभिः वक्राभिचाददानोर्थानर्जयामाससर्वतः पंच-
कोटीःसुवर्णस्यकृत्वराज्ञासमंकथाः ततोरहसिराजानंधूर्तमंत्रीजगादसः देवदत्तापिनित्यंतेदीनारशतपंच
कं त्वत्प्रसादान्मयाप्राप्ताःपंचकांचनकोटयः तत्प्रसीदगृहाणेदंस्वंस्वर्णमहमत्रकः इत्युक्त्वाप्रकटंतस्मैकनकंतन्न्य
वेदयत् राजापिन्नब्रुतस्तस्यजग्राहार्द्धंततोधनात् तुष्टश्चस्थापयामासमहामंत्रिपदेस्वतं सोपिप्राप्यश्रियंधूर्तोदान
भोगैरमानयत् एवंप्राप्नोतिमहतःप्राज्ञोर्थान्नातिपापतः कूपखानकवत्प्राप्तेफलेदोषंनिहंतिच इत्युक्तोगोमुखः
प्राहवत्सराजसुतंपुनः एकामिदानीमुद्वाहसोत्सुकःशृणुविमांकथां बभूवदुर्मदारातिकरीन्द्रकुलकेसरी रत्नाक
रारव्येनगरेनाम्नाबुद्धिप्रभोनृपः रत्नरेखाभिधानायांराज्ञांतस्योदपद्यत कन्याहेमप्रभानामसर्वलोकैकसुंदरी।

राम
६५

साच विद्याधरी शापादवतीर्णा यदा तदा नभोविहारसंस्कारमदाच्चिक्रीडदोलया वातभीत्या निषिद्धापि सा ततो
नचचालयत् तत्रास्यास पिता राजा चपेटां कुपितासावमानेन राजपुत्र्यावनैषिणी विहारव्यपदेशेन जगामोप
वनं बहिः पानमत्तेषु भृत्येषु संचरंती च तत्र सा प्रविश्य वृक्षगहनं तेषां दृष्टिपथात्ययौ गत्वा चैकाकिना दूरं व-
नं विरचितोटजा फलमूलाशिनी तस्थौ हराराधनतत्परा तत्पिता तु स राजा तां बुध्वा क्वापि ततो गतां अन्विष्यैष
नच प्राप महद्दुःखमवाप सः चिरात्किंचित्तनूभूतदुःखः श्वित्रं विनोदयन् बुद्धिः प्रभ स्म निरगान्मृगयायै महीपतिः।
भ्रमंश्च दैवात्तत्राप स सुदूरं स वनांतरं तपस्यंती सुता सास्यं यत्र हेमप्रभा स्थिता उटजं तत्र दृष्ट्वा स राजाभ्येत्य तदंत
रे अशंकितं तपःक्षामां तां ददर्श सुतां निजां सापि दृष्ट्वा तमुत्थाय पादयोः सहसाग्रहीत् आलिंग्य स पिता तां च
साश्रुरंके न्यवेशयत् तौ चान्योन्यं चिराद्दृष्ट्वा तथा रुरुदतुश्चिरं तदस्रवीय यथा तत्र वने भूवन्मृगा अपि ततः शनैः
स्तमाश्वास्य राजावोचत्स तां सुतां त्यक्त्वा राजश्रियं पुत्रि किमिदं विहितं त्वया तदेहि जननीपार्श्वं वनवासमिमं त्य
जः इत्युक्तवांसं जनकं सा तं हेमप्रभाभ्यधात् दैवेनैवं वियुक्तास्मि शक्तिश्चात्राधिका हि मे न चैष्यामि गृहं भोक्तुं
नत्यजामि तपःसुखं इति ब्रुवाणा सा तस्मान्निश्चयान्न चचालयत् तद्राजाकारयत्तस्या वने तत्रैव मंदिरं गत्वा च
राजधानीं स्वां प्रेषयामास सोन्वहं तस्या अतिथिपूजार्थं पक्वान्नानि धनानि च सा च हेमप्रभा तत्र धनैरन्नैश्च तैः

सदा प्रजयंत्यतिथीनासीत्फलमूलाशिनी स्वयं एकदा चाययौ तस्या राजपुत्र्यास्तदाश्रमे प्रव्राजिकैका भ्राम्यंती
कौमारब्रह्मचारिणी सा तयाभ्यर्चिता हेमप्रभया स्वकथांतरेः प्रव्रज्याकारणं पृष्टा बालां प्रव्राजिकाब्रवीत् संवाह
यंती चरणावहं कन्या सती पितुः सा दैवात्क्षणमभूवं निद्राकुलितलोचना किं दासाति पादेन ततः पित्राहमाहता त
न्मन्युनाप्रव्रजिता निर्गत्यैवास्मि तद्गृहात् इति प्रव्राजिकामुक्तवतीं हेमप्रभाथ सा समानशीलाप्रीता तां वनवासस
खीं व्यधात् एकदा तामवोचत्सा प्रातः प्रव्राजिकां सखीं सखि स्वप्ने न जानेहं उत्तीर्णा विपुलां नदीं आरूढास्मि ततः श्वे
तगजं तदनु पर्वतं तत्राश्रमे मया दृष्टो भगवानंबिकापतिः तदग्रे प्राप्य वीणां च गायंत्यहमवादयं तत्रापश्यं च पुरु
षं दिव्याकारमुपागतं तं दृष्ट्वा च त्वया साकमहमुत्पतितानभः इदं दृष्ट्वा प्रबुद्धास्मि व्यतिक्रांता च यामिनी एत
च्छ्रुत्वैव तां हेमप्रभामाह स्म सा सखी शापावतीर्णा कापि त्वं देवि कल्याणि निश्चितं प्रत्यासन्नं च शापांतं तव स्वप्नो
वदत्यसौ श्रुत्वैतदभ्यनंदत्सा राजपुत्री सखीवचः ततो भूयिष्ठमुत्तेजगद्दीपे दिवाकरे आययौ तुरगारूढो राजपु
त्रश्च कश्चन सतां हेमप्रभां दृष्ट्वा तापसावेषधारिणीं जातप्रीतिरुपागत्य ववंदे मुक्तवाहनः सापि तं रचितातिथ्या
थ्यात्तासनपरिग्रहं संजातप्रणया प्राक्षीन्महात्मन्को भवानिति राजपुत्रोथ सोवादीन्महाभागे महीपति प्रता
पसेन इत्यासीत्तु भनामानुकीर्त्तनं सतप्यमानः पुत्रार्थं हरस्याराधनं तपः तेनादिश्यत देवेन प्रादुर्भूय प्रसादिना॥

विद्याधरावतारस्तेपुत्रएकोभविष्यति सचशापक्षयेलोकंनिजमेवप्रयास्यति द्वितीयस्तुसुतोभावीवंशेराज्य
धरस्तव इत्युक्तःशंभुनोत्थायहृष्टश्चक्रेसपारणां: कालेनजातस्तस्यैकोलक्ष्मीसेनाभिधःसुतः शूरसेनाभि
धानश्चद्वितीयोनृपतेःक्रमात्‌ः तदिमंमांविजानाहिलक्ष्मीसेनंवरानने आनीतमिहवाताश्वेनातेष्याखेट
सु ४ निर्गतं इत्युक्तातेनसाप्युक्तासोदंतंतस्यैवततः सद्योहेमप्रभाजातिंस्मृत्वाहृष्टाजगादतं: त्वयिदृष्टेमयाजाति
र्विद्यानिस्त्रीहस्तास्मृता साकंसख्यानयाशापच्युताविद्याधरीह्यहं तंचविद्याधरःशापच्युतःस्वसचिवान्वितः
हेमप्रभात्वमुत्पन्नसास्वर्लोकमगात्ततः लक्ष्मीसेनश्चयावत्ससाश्चर्योत्रस्थितःक्षणात्‌ तावत्स्वसचिवस्तस्यचि
न्वानोमार्गमाययौ तस्मैसराजपुत्रश्चसख्येयावत्ब्रवीतितत्‌ तावद्बुद्धिप्रभोप्यागात्सराजासुतोत्सुकः सोद
ष्ट्वैवसुतांदृष्ट्वालक्ष्मीसेनंचपृष्टवान्‌ तस्याःप्रवृत्तिंसोप्यस्मैयथावृत्तंशशंसतत्‌ ततोबुद्धिप्रभेविद्रेलक्ष्मीसेनः
समंत्रिकः स्मृत्वाशापक्षयाज्जातिंस्वंलोकंनभसाययौ प्राप्यहेमप्रभांभार्यामागत्यचतयासह बुद्धिप्रभंतमा
मंत्र्यव्यसृजत्सनिजंपुरं गत्वाचप्राप्तभार्येणतेनसख्यासमंततः पित्रेप्रतापसेनायस्ववृत्तांतमवर्णयत्‌ तेन
दत्तंक्रमात्प्राप्तंराज्यंदत्वानुजन्मने शूरसेनायसययौनिजंवैद्याधरंपुरं तत्रविद्याधरैश्वर्यसुखंहेमप्रभायु
तः लक्ष्मीसेनःसभुंक्तेस्मसख्यातेनान्वितश्चिरं इत्थंकथानिगदिताःकिलगोमुखेनश्रुत्वाक्रमात्सनरवाहनद

शू०लं०१०
६७

67

त्तदेवः आसन्नवर्त्तिनवशक्तियशोविवाहसोत्कोपितांक्षणामिवक्षणाद्दां निनाय एवंविनोद्यसदिनानि च राज-
पुत्रः प्राप्ते विवाहदिवसे पित्रुरंतिकस्थः वसेश्वरस्य सहसानभसोवतीर्णं वैद्याधरंतपनदीप्तिबलं ददर्श तन्म
ध्ये च स्वकदुहितरं दिस्मितां तां गृहीत्वा प्रीत्या प्राप्तं स्फटिकयशसं वीक्ष्य विद्याधरेंद्रं प्रत्युज्जगाम श्वशुर इति तं स्वजवामा
सहर्षा द्वसेशेन प्रथम विहितातिथ्यमर्घ्यादिना सः सोप्यावेद्य यथार्थमंबरवराधीशः क्षणात्कल्पिताशेषस्वोचि
तदिव्य वैभव विधिः सिद्धिप्रभावात्तत रत्नौघप्रतिष्टरिताय विधिवद्वसेशपुत्राय तांतस्मै तां वितताऽनशक्तियश
संसर्वप्रदिष्टां सुतां स च नरवाहनदत्तो भार्यां विद्याधरेंद्रतनयां तां संप्राप्य शक्तियशसं पद्म इवार्कद्युतिं व्यरुचा-
त् स्फटिकयशस्य थयाते कौशांब्यां पुरि स वसराजसुतः शक्तियशोवदनांबुजके क्षणाबद्धदस्तदातस्थौ इदं
गुरुगिरींद्रजाप्रणयमंदराद्दोलनात्पुरा किलकथामृतं हरमुखांबुधेरुद्गतं प्रसह्य रसयंति ये विगतविघ्नल
ब्धर्द्धयो धुरं दधति वैबुधां भुवि भवप्रसादेन ते ॥ ॥ इति श्रीभट्टसोमदेवविरचिते कथासरित्सागरे शक्ति
यशोलंबके दशमस्तरंगः ॥ ॥ १० ॥ ॥ श्रीः ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ॥

आदितः षट्त्रिंशत्तमः

रामः
६७

प. ४०९



९८

॥ बृहत्कथादशमलंबकसमाप्त ।६७॥

२०।०

३८२०